4c इमैर्] K_{ED}BγV *MṛgTaVṛ*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; इनैर J ◆ **भिन्नं**] $K_{ED}\beta$G *MṛgTaVṛ*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; ⟨भिन्नं⟩ मन्त्रं P **5b तु कलान्तिकम्**] $K_{ED}\alpha$ *JaMaViv*$_{KSTS}$; तत्कलान्तकम् *TaĀlViv*$_{KSTS}$ **5d प्रलयाकलः**] α *TaĀl*$_{KSTS}$ 10.4ब *TaĀlViv*$_{KSTS}$, *JaMaViv*$_{KSTS}$; प्रलयाकलाः K_{ED} **6a मायापि**] K_{ED}BγV *TaĀlViv*$_{KSTS}$ *JaMaViv*$_{KSTS}$; मयापि J **6b °केवलः**] β *JaMaViv*$_{KSTS}$; °केवलाः $K_{ED}\gamma$ *TaĀlViv*$_{KSTS}$ **7c भेदः**] $K_{ED}\beta$G *TaĀlViv*$_{KSTS}$; भेदाः P ◆ **लेशाद्**] $K_{ED}\beta$; लेशान् G, क्लेशाद् P **7d अनन्तो**] $K_{ED}\beta$P *TaĀlViv*$_{KSTS}$; आनन्तो G ◆ **विस्तरादयम्**] K_{ED}-$B^{pc}\gamma$ *TaĀlViv*$_{KSTS}$; विस्तरादयः B^{ac}VJ **8b भेदैर्**] K_{ED}BγJ *TaĀlViv*$_{KSTS}$; भेदेर् V

4c इमैः :: An *aiśa* variant of एभिः (excluded *metri causa*); *cf.* VīTa$_{G}$ 194c. **5d, 6b प्रलयाकलः, ज्ञानकेवलः** :: The collective singulars of β have been preferred to the two plurals of K_{ED}, only one of which is attested.

विज्ञेया योगसिद्ध्यर्थं योगिभिर्योगपूजिता ॥८॥
एतेषामेव तत्त्वानां भुवनानां च शाङ्करि ।
य एकमपि जानाति सोऽपि योगफलं लभेत् ॥९॥

[गुरुलक्षणम्]

यः पुनः सर्वतत्त्वानि वेत्त्येतानि यथार्थतः ।
स गुरुर्मत्समः प्रोक्तो मन्त्रवीर्यप्रकाशकः ॥१०॥
दृष्टाः संभाषितास्तेन स्पृष्टाश्च प्रीतचेतसा ।
नराः पापैः प्रमुच्यन्ते सप्तजन्मकृतैरपि ॥११॥
ये पुनर्दीक्षितास्तेन प्राणिनः शिवचोदिताः ।

10–11ab *cit.* JaMaVi$_{K}$ p. 5$^{16-11}$ **10–12** = TaĀl$_{KSTS}$ 13.219cd–222ab; *cit.* TaĀlViv$_{KSTS}$ 23.11–12ab:*a* **10a** **यः → वेत्ति** :: = TaĀl$_{KSTS}$ 23.12ab; *cit.* TaĀlViv$_{KSTS}$ 23.77:*a* **10cd** = SiYoMa$_{T}$ 2.11cd; *cit.* ŚiSūVim$_{KSTS}$ 2.6:*a* **11a** *cf.* TriSā *cit.* at TaĀl$_{KSTS}$ 15.546ab **11ab** = TaĀl$_{KSTS}$ 13.220cd; Δ JaRaYām$_{S}$ Ṣaṭka 4 Paṭala 4.87–89; *cf.* NiśTaSaṃ$_{NAK}$ Mūlasūtra Paṭala 9 (fol. 22v³): यं यं स्पृशति हस्तेन यं यं पश्यति चक्षुषा । ध्यात्वा तत्त्वं तु मेधावी दीक्षितं तं विनिर्दिशेत्; *cf.* anonymous citation at ŚiSūVim$_{KSTS}$ 3.28:*a*; *cf.* Cintyāgama IFI TS 13, 13.40: चाक्षुषी स्पर्शदीक्षा च वाचिकी मानसी तथा। शास्त्री च योगदीक्षा च हौत्रीत्यादिरनेकधा **12** *cf.* SiYoMa$_{T}$ 2.1–3

Codd: K$_{1}$ K$_{2}$ K$_{3}$ K$_{4}$ $\simeq$ K$_{ED}$; B V J G P = α; B V J = β; G P = γ

9a **एव**] K$_{ED}\gamma$; इह β **9c** **अपि**] K$_{ED}$BγJ; ⟨अपि⟩ V **10b** **वेत्त्य्**] K$_{ED}$BGV *TaĀl$_{KSTS}$ JaMaViv$_{KSTS}$*; वेत्य् J, वे⟨त्त्य्⟩ P **10d** **°प्रकाशकः**] K$_{ED}\beta$G *TaĀl$_{KSTS}$ ŚiSūVim$_{KSTS}$ JaMaViv$_{KSTS}$*; °पराक्रमः P **11a** **दृष्टाः**] *TaĀl$_{KSTS}$ JaMaViv$_{KSTS}$*; स्पृष्टाः K$_{ED}\beta$G; सृष्टा ⟨दृष्ट्वा⟩ P ♦ **संभाषितास्**] K$_{ED}\beta$G *TaĀlViv$_{KSTS}$ (supported by the JaRaYām$_{S}$) JaMaViv$_{KSTS}$*; संभावितास् K$_{2}$ *TaĀl$_{KSTS}$* Gnoli; , संभा⟨वि⟩तास् P **11b** **स्पृष्टाश्**] *TaĀl$_{KSTS}$ JaMaViv$_{KSTS}$*; दृष्टाश् K$_{ED}\beta$G, ⟨स्प⟩स्टाच् P **11d** **°जन्मकृतैर्**] K$_{ED}\beta$P *TaĀl$_{KSTS}$ JaMaViv$_{KSTS}$*; °जन⟦मै⟧मकृतैर् G **12b** **प्राणिनः**] K$_{ED}\beta$G *TaĀl$_{KSTS}$*; प्राणिनाः P

ते यथेष्टं फलं प्राप्य गच्छन्ति परमं पदम् ॥१२॥
रुद्रशक्तिसमावेशस्तत्र नित्यं प्रतिष्ठितः ।

[आवेशचिह्नपञ्चकम्]

सति तस्मिंश्च चिह्नानि तस्यैतानि विलक्षयेत् ॥१३॥
तत्रैतत्प्रथमं चिह्नं रुद्रे भक्तिः सुनिश्चला ।
द्वितीयं मन्त्रसिद्धिः स्यात्सद्यःप्रत्ययकारिका ॥१४॥
सर्वसत्त्ववशित्वं च तृतीयं लक्षणं स्मृतम् ।
प्रारब्धकार्यनिष्पत्तिश्चिह्नमाहुश्चतुर्थकम् ॥१५॥
कवित्वं पञ्चमं प्रोक्तं सालंकारं मनोहरम् ।
सर्वशास्त्रार्थवेत्तृत्वमकस्माच्चास्य जायते ॥१६॥

13–16 ∆ SiYoMa$_{T}$ 2.3–8, paraphrase TaĀl$_{KSTS}$ 13.214–216; *cit.* TaĀlViv$_{KSTS}$ 13.214–216:*a*; (*cf.* also MVUT 1.43–45); *cf.* KulSā$_{NAK}$ fol. 23v **13cd** *cf.* SiYoMa$_{T}$ 2.4 **14ab** *cit.* TaĀlViv$_{KSTS}$ 13.117cd–120ab:*a*, 3.291cd–292; ≈ SiYoMa$_{T}$ 2.6ab: प्रथमं लक्षणं प्रोक्तं रुद्रे भक्तिः सुनिश्चला **14cd** ≈ SiYoMa$_{T}$ 2.6cd **15ab** *cf.* SiYoMa$_{T}$ 2.7ab: तृतीयं सर्वसत्त्वानां किंकुर्वाणविधेयता **15cd** ≈ SiYoMa$_{T}$ 2.7cd: …चतुर्थं लक्षणं स्मृतम् **16ab** = SiYoMa$_{T}$ 2.8ab **16cd** = TaĀl$_{KSTS}$ 13.215cd, 4.45cd, 15.15cd

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

12c **यथेष्टं फलं**] $K_{ED}\gamma$ *TaĀl*$_{KSTS}$; यथेष्टफलं β **12d** **गच्छन्ति परमं पदम्**] $K_2\beta$P; पदं गच्छन्त्यनामयम् K_{ED} *TaĀl*$_{KSTS}$, पदं गच्छन्ति नामयम् G, प्रयान्ति परमं पदम् *TaĀlViv*$_{KSTS}$ **13b** **प्रतिष्ठितः**] $K_{ED}\beta$G *TaĀlViv*$_{KSTS}$; प्रतिष्टितः P **14c** **मन्त्र°**] K_{ED}Bγ *TaĀlViv*$_{KSTS}$; मन्त्रसं° V *(hypermetrical)*, मत्र° J **15a** **°सत्त्ववशित्वं**] K_{ED}GV; °तत्त्ववशित्वं BJ *TaĀl*$_{KSTS}$ *TaĀlViv*$_{KSTS}$, °सत्त्वावशित्वं P **15c** **°कार्यनिष्पत्तिश्**] K_{ED}GV *TaĀlViv*$_{KSTS}$; °भोगनिष्पत्तिश् B, °⟨कर्म⟩निष्पत्तिश् J, °कार्यनिः-पत्तिश् P **16a** **प्रोक्तं**] α; ज्ञेयं K_{ED} *TaĀlViv*$_{KSTS}$ **16b** **मनोहरम्**] $K_{ED}\gamma$J *TaĀlViv*$_{KSTS}$; मनोरमम् BV **16c** **°वेत्तृत्वम्**] $K_{ED}\alpha$ *TaĀl*$_{KSTS}$ 4.45c, 15.15c *TaĀlViv*$_{KSTS}$; °बोद्धृत्वम् *TaĀl*$_{KSTS}$ 13.215c

[आवेशस्य पञ्चाशद्भेदाः]

रुद्रशक्तिसमावेशः पञ्चधा परिपठ्यते ।
भूततत्त्वात्ममन्त्रेशशक्तिभेदाद्वरानने ॥१७॥
पञ्चधा भूतसंज्ञस्तु तथा त्रिंशतिधा परः ।
आत्माख्यस्त्रिविधः प्रोक्तो दशधा मन्त्रसंज्ञकः ॥१८॥
द्विविधः शक्तिसंज्ञोऽपि ज्ञातव्यः परमार्थतः ।
पञ्चाशद्भेदभिन्नोऽयं समावेशः प्रकीर्तितः ॥१९॥

[आणवः शाक्तः शाम्भवश्चेत्युपायत्रयम्]

आणवोऽयं समाख्यातः शाक्तोऽप्येवंविधः स्मृतः ।
एवं शाम्भवमप्येभिर्भेदैरभिन्नं विलक्षयेत् ॥२०॥
उच्चारकरणध्यानवर्णस्थानप्रकल्पनैः ।

17–19 paraphrase TaĀl$_{KSTS}$ 1.186cd–187ab; *cit.* TaĀlViv$_{KSTS}$ 1.186cd–187ab:*a* **17–23** *cf.* ŪrKauĀr$_{NAK}$ fol. 19^{v}–20^{r}; *cf.* KubMaTa$_{G}$ 10.65–97; *cf.* PaTriVi$_{S}$ p. 8$^{20–22}$; *cf.* ParMoNirKā 13b; *cf.* ŚiDṛ$_{KSTS}$ 1; *cf.* ĪPraKā$_{T}$ 3.2.12d; *cf.* MatPārVṛ$_{BH}$ 8.10cd–12ab, and ŚaiPa 5 § 32 attribute the doctrine of achieving शिवसाम्य° by means of समावेश° to the Kāpālikas **17ab** = TaĀl$_{KSTS}$ 1.192ab **17c** **भूत°** :: *cf.* TaĀl$_{KSTS}$ 1.190–191; *cf.* MVUT 13.54–61 **21a** **°करण°** :: *cf.* MatPār$_{BH}$ YP 2.22cd–29; *cf.* SvaTa$_{KSTS}$ 4.365cd–367ab; *cf.* TaĀl$_{KSTS}$ 5.128ab–131ab; *cf.* ŚārTil 25.45–47ab; *cf.* MatsySaṃ$_{W}$ 1.382; *cf.* JaĀkhSaṃ$_{GOS}$ 33.18cd–22

Codd: K$_{1}$ K$_{2}$ K$_{3}$ K$_{4}$ $\simeq$ K$_{ED}$; B V J G P = α; B V J = β; G P = γ

17b परिपठ्यते] K$_{ED}$$\alpha$; ननु चर्च्यते *TaĀl*$_{KSTS}$*TaĀlViv*$_{KSTS}$ **18ab °संज्ञस्तु तथा त्रिंशतिधा परः**] K$_{ED}$$\alpha$; °संज्ञोऽत्र त्रिंसद्धा तु तथापरः *TaĀlViv*$_{KSTS}$ **19a द्विविधः**] K$_{ED}$$\beta$G *TaĀlViv*$_{KSTS}$; द्विविधा P **21b प्रकल्पनैः**] K$_{ED}$$\gamma$VJ *TaĀl*$_{KSTS}$ *ŚiSūVim*$_{KSTS}$ *SāmPañ*$_{KS}$; विकल्पनैः K$_{3}$B

योे भवेत्स समावेशः सम्यगाणव उच्यते ॥२१॥
उच्चाररहितं वस्तु चेतसैव विचिन्तयन् ।
यमावेशमवाप्नोति शाक्तः सोऽत्राभिधीयते ॥२२॥
अकिंचिच्चिन्तकस्यैव गुरुणा प्रतिबोधतः ।
जायते यः समावेशः शाम्भवोऽसावुदीरितः ॥२३॥
सार्धमेतच्छतं प्रोक्तं भेदानामनुपूर्वशः ।
संक्षेपाद्विस्तरादस्य परिसंख्या न विद्यते ॥२४॥
संवित्तिफलभेदोऽत्र न प्रकल्प्यो मनीषिभिः ।
[पञ्चदशादिभेदेषु जाग्रदाद्यवस्थाः]
भेदोऽपरोऽपि संक्षेपात्कथ्यमानोऽवधार्यताम् ॥२५॥

21 *cit.* ŚiSūVim$_{\text{KSTS}}$ 3.4:*c* **21–23** = TaĀl$_{\text{KSTS}}$ 1.168–170 transposition: 23, 22, 21; followed by exposition TaĀl$_{\text{KSTS}}$ 1.171ff.; *cit.* ViBhaiViv$_{\text{KSTS}}$ 24:*b* in the same order as in the TaĀl$_{\text{KSTS}}$ **22** *cit.* ŚiSūVim$_{\text{KSTS}}$ 1.6:*c*, 2.10:*f* **23** *cit.* ŚiSūVim$_{\text{KSTS}}$ 1.5:*a*; StaCiViv$_{\text{KSTS}}$ 1:*a* **25ab** paraphrase TaĀl$_{\text{KSTS}}$ 1.227ab; *cit.* TaĀlViv$_{\text{KSTS}}$ 1.227:*a*, 5.154cd–155ab:*a*, 13.1:*a* intro, 34.3:*a*; *cit.* StaCiViv$_{\text{KSTS}}$ 34:*a* **25cd–48ab** exegesis: TaĀl$_{\text{KSTS}}$ 10.227cd–309; *cf.* ViBhai$_{\text{KSTS}}$ 86

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

22b **चेतसैव**] K_{ED}BγV *TaĀl$_{\text{KSTS}}$ ŚiSūVim$_{\text{KSTS}}$ SāmPañ$_{\text{KS}}$* ; चैतसैव J **22c** **यमावेशमवाप्नोति**] BγV; यं समावेशमाप्नोति K_{ED}J *TaĀl$_{\text{KSTS}}$ ŚiSūVim$_{\text{KSTS}}$ SāmPañ$_{\text{KS}}$* **23b** **प्रतिबोधतः**] $K_{ED}\beta$G *TaĀl$_{\text{KSTS}}$ ŚiSūVim$_{\text{KSTS}}$ StaCiViv$_{\text{KSTS}}$ SāmPañ$_{\text{KS}}$* ; प्रतिबोधितः P **23c** **जायते यः समावेशः**] $K_{ED}\alpha$ *ŚiSūVim$_{\text{KSTS}}$* ; उत्पद्यते य आवेशः *TaĀl$_{\text{KSTS}}$ StaCiViv$_{\text{KSTS}}$ SāmPañ$_{\text{KS}}$* **23d** **उदीरितः**] K_3B$^{vl}\gamma$VJ *TaĀl$_{\text{KSTS}}$ ŚiSūVim$_{\text{KSTS}}$ StaCiViv$_{\text{KSTS}}$*; उदाहृतः K_{ED}B *SāmPañ$_{\text{KS}}$* **24c** **संक्षेपाद्**] K_{ED}BγJ; संक्षीपाद् V **25a** **संवित्तिफलभेदो**] $K_{ED}\beta$G *TaĀl$_{\text{KSTS}}$* 1.227a *TaĀlViv$_{\text{KSTS}}$* 1.227:*a StaCiViv$_{\text{KSTS}}$*; संविदि फलभेदो *TaĀlViv$_{\text{KSTS}}$* 13.1:*a unmetrical*; संवित्तिफलभोदे P **25c** **संक्षेपात्**] K_{ED}BγJ; संक्षीपात् V **25d** **कथ्यमानो**] K_{ED}BGV; कथ्यमाने JP

जाग्रत्स्वप्नादिभेदेन सर्वाविशक्रमो बुधैः ।
पञ्चभिन्नः परिज्ञेयः स्वव्यापारात्पृथक्पृथक् ॥२६॥
तत्र स्वरूपं शक्तिश्च सकलश्चेति तत्त्रयम् ।
इति जाग्रदवस्थेयं भेदे पञ्चदशात्मके ॥२७॥
अकलौ द्वौ परिज्ञेयौ सम्यक्स्वप्नसुषुप्तयोः ।
मन्त्रादितत्पतीशानवर्गस्तुर्य इति स्मृतः ॥२८॥
शक्तिशंभू परिज्ञेयौ तुर्यातीते वरानने ।
त्रयोदशात्मके भेदे स्वरूपमकलावुभौ ॥२९॥
मन्त्रमन्त्रेश्वरेशानाः शक्तिशंभू च कीर्तितौ ।
प्रलयाकलभेदेऽपि स्वं विज्ञानकलावुभौ ॥३०॥

26cd *cf.* PaTriVi$_{S}$ p. 8^{23}: जाग्रदादिष्वपि स्वात्मन्येव चतुरादिभेदतयोत्तरोत्तरत्वम्; *cf.* ŚiSūVim$_{KSTS}$ 1.8–10: त्रिष्वपि जागरादिदशासु त्रैरूप्यमस्तीति; *cf.* TaĀl$_{KSTS}$ 10.238ab **26d** *cf.* TaĀl$_{KSTS}$ 10.178b **27–35ab** paraphrase TaĀl$_{KSTS}$ 10.302–309; *cit.* TaĀlViv$_{KSTS}$ 10.309:*a*

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

26b सर्वाविशक्रमो] $K_{ED}B^{pc}$GV; सर्वाविशः क्रमो B^{ac}JP **26c पञ्चभिन्नः**] *conj.*; पञ्चभिस्तु $K_{ED}\alpha$ ♦ **परिज्ञेयः**] K_{ED}; परि** B^{ac}V, परि⟨ज्ञेयो⟩ B^{pc}, परिज्ञेयं GP, परि⟨ज्ञेयो⟩ *completed secunda manu* J **26d स्वव्यापारात्**] K_{ED}; भेदैश्चान्यैः K_2 Gnoli; ⟨स्वव्यापारात⟩ भ, स्वव्या⟨पा⟩ʔरात्ʔ G, **** V, ⟨विस्तरात्तु⟩ J, *** P **27a तत्र स्वरूपं**] $K_{ED}\alpha$ *TaĀl*$_{KSTS}$; स्वरूपं तत्र *TaĀlViv*$_{KSTS}$ **28b स्वप्नसुषुप्तयोः**] K_{ED}BGV *TaĀlViv*$_{KSTS}$; स्वप्नसुप्तयोः J *unmetrical*, स्वप्नस्वषुप्तयोः P **29a शक्तिशंभू**] $K_{ED}\beta$G *TaĀlViv*$_{KSTS}$; शक्तिशंभु P **29d स्वरूपमकलाव्**] $K_{ED}^{pc}K_3B\gamma$; स्वरूपसकलाव् $K_{ED}^{ac}B^{vl}$VJ *TaĀlViv*$_{KSTS}$ **30a °मन्त्रेश्वरेशानाः**] K_{ED}GVJ *TaĀlViv*$_{KSTS}$; °मन्त्रेश्वर⟦ा⟧⟨ए⟩*नाः भ, °मन्त्रेश्वरेशाना P **30b शक्तिशंभू च कीर्तितौ**] $K_{ED}\beta$ *TaĀlViv*$_{KSTS}^{vl}$; शक्तिशंभु च कीर्तितौ γ, शक्तिशावपि पूर्ववत् *TaĀlViv*$_{KSTS}$

27a तत्र स्वरूपं :: A correct *[ra]ma-vipulā* --⏑--,---⏑. The TaĀlViv$_{KSTS}$ produces a *pathyā-* form.

मन्त्रमन्त्रेश्वरेशानाः शक्तीशावपि पूर्ववत् ।
नवधा कीर्तिते भेदे स्वं मन्त्रा मन्त्रनायकाः ॥३१॥
तदीशाः शक्तिशंभू च पञ्चावस्थाः प्रकीर्तिताः ।
पूर्ववत्सप्तभेदेऽपि स्वं मन्त्रेशेशशक्तयः ॥३२॥
शिवश्चेति परिज्ञेयाः पञ्चैव वरवर्णिनि ।
स्वं शक्तिः सनिजेशाना शक्तिशंभू च पञ्चके ॥३३॥
त्रिके स्वशक्तिशक्तीच्छाशिवपदं विलक्षयेत् ।

[शिवस्य पञ्चात्मता]

स्वव्यापाराधिपत्वेन तद्धीनप्रेरकत्वतः ॥३४॥
इच्छानिवृत्तेः स्वस्थत्वादभिन्नमपि पञ्चधा ।

32c *cf.* TaĀl$_{KSTS}$ 10.306a: सप्तभेदे तु मन्त्राख्ये **34c** = TaĀl$_{KSTS}$ 10.185c **34cd–35a** = MāViVār$_{H}$ 1.51abc **34cd–35ab** *cit.* TaĀlViv$_{KSTS}$ 10.185–186ab:*a*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

31a मन्त्रमन्त्रेश्वरेशानाः] K_{ED} *TaĀlViv*$_{KSTS}$; मन्त्रा मन्त्रेश्वराश्चेति BG, मन्त्रा मन्त्रेश्वराश्चैव V, मन्त्रा मन्त्रेश्वरश्चेति J, मन्त्रमन्त्रेश्वराश्चेति P **31c नवधा**] $K_{ED}\beta$G *TaĀlViv*$_{KSTS}$; नवदा P ♦ **कीर्तिते भेदे**] K_{ED}B^{mg}GJ *TaĀlViv*$_{KSTS}$; कीर्तिभेदेन BV, कीर्ति⟨ते⟩ *unmetrical*P **31d स्वं मन्त्रा**] γJ *TaĀlViv*$_{KSTS}$; स्वं मन्त्राः K_{ED}, ⟦∗त⟧स्वमन्त्रा B, स्वमन्त्रा V **32a तदीशाः**] $K_{ED}\gamma$VJ *TaĀlViv*$_{KSTS}$; तदीशः B ♦ **शक्तिशंभू**] $K_{ED}\beta$G *TaĀlViv*$_{KSTS}$; शक्तिशंभु P **32c सप्तभेदे**] BγV *TaĀl*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; सप्तभेदो K_{ED}J **32d मन्त्रेशेशशक्तयः**] K_{ED}B$^{pc}\gamma$ *TaĀlViv*$_{KSTS}$; मन्त्रेशेषशक्तयः β **33a परिज्ञेयाः**] K_{ED}B^{mg} *TaĀlViv*$_{KSTS}$; परिज्ञेयः BγV, प्रतिज्ञेयः J **33c सनिजेशाना**] K_{ED}^{pc}; स्वा निजेशानाः K_{ED}^{ac}J *TaĀlViv*$_{KSTS}$ Gnoli, स्वनिजेशानाः K_1BγV **34ab स्वशक्तिशक्तीच्छाशिवपदं**] β; स्वं शक्तिशक्तीच्छाशिवभेदं K_{ED}B$^{mg}\gamma$ *TaĀlViv*$_{KSTS}$ **34c स्वव्यापाराधिपत्वेन**] BV; सव्यापाराधिपत्वेन K_{ED}J *MāViVār*$_{H}$ *TaĀl*$_{KSTS}$ *TaĀlViv*$_{KSTS}$, स्वव्यापारादिभेदेन G, स्वव्यापारादिपत्येन P^{ac}, स्वव्यापाराद्यत्येन P^{pc} **35a स्वस्थत्वाद्**] $K_{ED}\beta$ *TaĀlViv*$_{KSTS}$ *MāViVār*$_{H}$; स्वस्थत्वाम् G, स्व∗त्वाम् P **35b अपि**] $K_{ED}\alpha$ *TaĀlViv*$_{KSTS}$ 10.185–186ab:*a*; चेति *TaĀlViv*$_{KSTS}$ 10.309:*a*

इति पञ्चात्मके भेदे विज्ञेयं वस्तु कीर्तितम् ॥३५॥
[पञ्चावस्थानां भेदाः]
भूयोऽप्यासामवस्थानां संज्ञाभेदः प्रकाश्यते ।
पिण्डस्थः सर्वतोभद्रो जाग्रन्नामद्वयं मतम् ॥३६॥
द्विसंज्ञं स्वप्नमिच्छन्ति पदस्थं व्याप्तिरित्यपि ।
रूपस्थं तु महाव्याप्तिः सुषुप्तस्यापि तद्द्वयम् ॥३७॥
प्रचयं रूपातीतं च सम्यक्तुर्यमुदाहृतम् ।
महाप्रचयमिच्छन्ति तुर्यातीतं विचक्षणाः ॥३८॥
पृथक्तत्त्वप्रभेदेन भेदोऽयं समुदाहृतः ।
[पञ्चावस्थास्तत्त्वेषु]
सर्वाणि एव तत्त्वानि पञ्चैतानि यथा शृणु ॥३९॥

35cd–46ab paraphrase and exegesis following Śambhunātha: TaĀl$_{\text{KSTS}}$ 10.228cd–286 **36–39ab** *cf.* MVUT 19.30–48 (कुलचक्रव्याप्तिः), 20.1–26ab; *cf.* KulSā$_{\text{NAK}}$ 4[–7?]; *cf.* KulPañ$_{\text{NAK}}$ 1–4; *cf.* KauJñāNir$_{\text{BA}}$ 3: four कुललक्ष°: स्थान° = पिण्ड°, ध्यान° = पद°, वर्ण° = रूप°, लक्ष° = रूपातीत° (*cf.* YoViṃ 2: ठाण°, उन्न°, अत्थ°, आलंबण°, आलंबणरहिअ°); *cf.* KubMaTa$_{\text{G}}$ 17–19 *passim*, 11.6–7; *cf.* AkVīTa A 69–70; *cf.* ŚiDṛ$_{\text{KSTS}}$ 7.26–34; *cf.* ŚārTil 25.62ff.; *cf.* YoŚā 7–10 **36cd** *cit.* TaĀlViv$_{\text{KSTS}}$ 10.242:*a* **37ab** *cit.* TaĀlViv$_{\text{KSTS}}$ 10.252cd–253ab:*a* **37cd** *cit.* TaĀlViv$_{\text{KSTS}}$ 10.261–262:*a* **38ab** *cit.* TaĀlViv$_{\text{KSTS}}$ 10.273cd–275ab:*a* **38cd** *cit.* TaĀlViv$_{\text{KSTS}}$ 10.280cd–281ab:*a*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

35c पञ्चात्मके भेदे] K_{ED}Bγ; पञ्चात्मभेदेन K_1VJ **36b संज्ञाभेदः**] $K_{\text{ED}}\beta$G; संज्ञाभेदाः P ◆ **प्रकाश्यते**] K_{ED}B^{pc}G; प्रकश्यते B^{ac}V, प्रकाशते JP **37a स्वप्नम्**] $K_{\text{ED}}\gamma$ *TaĀl*$_{\text{KSTS}}$; सुप्तम् β **37d सुषुप्तस्यापि**] $K_{\text{ED}}\beta$G *TaĀlViv*$_{\text{KSTS}}$; स्वषुप्तस्यापि P **38a प्रचयं**] $K_{\text{ED}}\alpha$; प्रचयो *TaĀlViv*$_{\text{KSTS}}$ **38d विचक्षणाः**] $K_{\text{ED}}\beta$G *TaĀlViv*$_{\text{KSTS}}$; विचक्षणः P **39c सर्वाणि एव**] *conj. (aiśa-hiatus)*; सर्वाण्येव हि $K_{\text{ED}}\gamma$J, सर्वाण्येव ⟨हि⟩ BV

39c **सर्वाणि एव** :: aiśa-hiatus restored.

भूततत्त्वाभिधानानां योंऽशोऽधिष्ठेय इष्यते ।
पिण्डस्थमिति तं प्राहुः पदस्थमपरं विदुः ॥४०॥
मन्त्रास्तत्पतयः सेशा रूपस्थमिति कीर्त्यते ।
रूपातीतं परा शक्तिः सव्यापाराप्यनामया ॥४१॥
निष्प्रपञ्चो निराभासः शुद्धः स्वात्मन्यवस्थितः ।
सर्वातीतः शिवो ज्ञेयो यं विदित्वा विमुच्यते ॥४२॥

[पिण्डादीनां भेदाः]

चतुर्विधं तु पिण्डस्थमबुद्धं बुद्धमेव च ।
प्रबुद्धं सुप्रबुद्धं च पदस्थं च चतुर्विधम् ॥४३॥
गतागतं सुविक्षिप्तं सङ्गतं सुसमाहितम् ।

40a *cf.* SvaTa$_{KSTS}$ 11.87cd, 11.91c; *cf.* MatPār$_{BH}$ VP 2.16ff; *cf.* MVUT 2.17cd **40abc** = TaĀl$_{KSTS}$ 10.241 **40d–42** = TaĀl$_{KSTS}$ 10.284d–286 **41cd** *cf.* TaĀl$_{KSTS}$ 10.271cd–272ab **43abc** ≈ TaĀl$_{KSTS}$ 10.239cd–240ab; *cit.* TaĀlViv$_{KSTS}$ 10.239cd–240ab:*a*; *cf.* SvaTa$_{KSTS}$ 11.83cd–84ab, 11.91–126; *cf.* MahBhāp 12.291–292 **43bc** *cit.* ŚiSūVim$_{KSTS}$ 1.8–10:*a* **43d–44ab** *cit.* TaĀlViv$_{KSTS}$ 10.252cd–253ab:*b*

Codd: K$_1$ K$_2$ K$_3$ K$_4$ ≃ K$_{ED}$; B V J G P = α; B V J = β; G P = γ

40b **योऽंशो**] *TaĀl*$_{KSTS}$; योगो K$_{ED}$$\alpha$ ♦ **इष्यते**] K$_{ED}$$\beta$ *TaĀl*$^{vl}_{KSTS}$; उच्यते K$_3$ *TaĀl*$_{KSTS}$, दृश्यते γ **41c** **रूपातीतं**] K$_{ED}$$\gamma$J *TaĀl*$_{KSTS}$; रूपातीता B, रूपातीत V **41d** **सव्यापाराप्य्**] K$_{ED}$$\beta$G *TaĀl*$_{KSTS}$; साव्याराप्य् P*unmetrical* **42b** **स्वात्मन्यवस्थितः**] K$_{ED}$$\gamma$ *TaĀl*$_{KSTS}$; स्वात्मव्यवस्थितः β **43a** **तु**] K$_{ED}$Bγ *TaĀlViv*$_{KSTS}$; च VJ **43c** **सुप्रबुद्धं**] K$_{ED}$$\beta$GVJ *TaĀlViv*$_{KSTS}$ *ŚiSūVim*$_{KSTS}$; स्वप्रबुद्धं P **43d** **चतुर्विधम्**] K$_{ED}$$\beta$P *TaĀlViv*$_{KSTS}$; चतुर्विधं दण्ड G **44a** **सुविक्षिप्तं**] K$_{ED}$$\beta$G *TaĀlViv*$_{KSTS}$; स्वविक्षिप्तं P **44b** **सुसमाहितम्**] K$_{ED}$$\beta$G *TaĀlViv*$_{KSTS}$; स्वसमाहितम् P

43d **चतुर्विधम्।**:: In place of the appropriate punctuation G spells out the word दण्ड° at the end of the verse (an indication of dictation).

चतुर्धा रूपसंस्थं तु ज्ञातव्यं योगचिन्तकैः ॥४४॥
उदितं विपुलं शान्तं सुप्रसन्नमथापरम् ।
मनोन्मनमनन्तं च सर्वार्थं सततोदितम् ॥४५॥
प्रचये तत्र संज्ञेयमेकं तन्महति स्थितम् ।
इत्येवं पञ्चधाध्वानं त्रिधेदानीं निगद्यते ॥४६॥

[तत्त्वानां त्रैविध्यम्]

विज्ञानाकलपर्यन्तमात्मतत्त्वमुदाहृतम् ।
ईश्वरान्तं च विद्याह्वं शेषं शिवपदं विदुः ॥४७॥
एवं भेदैरिमैर्भिन्नस्तत्राध्वा परिकीर्तितः ।
युगपत्सर्वमार्गाणां प्रभेदः प्रोच्यतेऽधुना ॥४८॥

[षडध्वा]

पार्थिवं प्राकृतं चैव मायीयं शाक्तमेव च ।

44cd–45ab *cit.* TaĀlViv$_{KSTS}$ 10.263–264ab:*a* **45cd–46ab** *cit.* TaĀlViv$_{KSTS}$ 10.281cd–282ab:*a* **47** paraphrase TaĀl$_{KSTS}$ 11.35; *cit.* TaĀlViv$_{KSTS}$ 11.34cd–35

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P[−48] = α; B V J = β; G P[−48] = γ

44c °संस्थं] βP *TaĀlViv*$_{KSTS}$; °संज्ञं K_{ED}G *TaĀlViv*$^{vl}_{KSTS}$ **45b सुप्रसन्नम्**] K_{ED}BGV *TaĀlViv*$_{KSTS}$; सुप्र⟨स⟩न्नम् *completed secunda manu* J, स्वप्रसन्नम् P **45d सततोदितम्**] K_{ED}B^{vl} *TaĀlViv*$_{KSTS}$; सर्वतोदितम् α **46a प्रचये तत्र**] K_{ED}B^{mg}γV *TaĀlViv*$_{KSTS}$; प्रचयेत्तन्त्र° B, प्रचये तन्त्र° J ♦ **संज्ञेयम्**] $K_{ED}$$\gamma$ *TaĀlViv*$_{KSTS}$; यं ज्ञेयम् β **46b तन्महति**] $K^{pc}_{ED}$$K_1$$\beta$; तन्महसि K^{ac}_{ED}B^{mg}γ *TaĀlViv*$_{KSTS}$ **47c ईश्वरान्तं**] $K_{ED}$$\beta$G *TaĀlViv*$_{KSTS}$; ईश्वरान्त्यं P **47d शिवपदं**] K_{ED}GV *TaĀlViv*$_{KSTS}$; शिव⟦ं⟧⟨पदं⟩ B, ⟨यत्तत⟩ शिवं J^{mg}, शिवमतं P^{ac} **48d ऽधुना**] $K_{ED}$$\beta$; ऽध्वना γ **49b एव च**] K_{ED}G *TaĀlViv*$_{KSTS}$; उच्यते β

48d The testimony of P is interrupted for MVUT 2.48d–3.60a. The lacuna is not marked and there is no colophon for *Adhikāra* 2.

इति सङ्क्षेपतः प्रोक्तमेतदण्डचतुष्टयम् ॥४९॥
पृथग्द्वयमसङ्ख्यातमेकमेकं पृथक्पृथक् ।

[धारिकाकला]

आद्यं धारिकया व्याप्तं तत्रैकं तत्त्वमिष्यते ॥५०॥
एकमेकं पृथक्क्षार्णं पदार्णमनुषु स्मरेत् ।
कालाग्निभुवनाद्यावद्वीरभद्रपुरोत्तमम् ॥५१॥
पुरषोडशकं ज्ञेयं षड्विधोऽध्वा प्रकीर्तितः ।

[आप्यायिनीकला]

आप्यायिन्या द्वितीयं च तत्र तत्त्वानि लक्षयेत् ॥५२॥
त्रयोविंशत्यबादीनि तद्वद्वाद्यक्षराणि च ।
पदानि पञ्च मन्त्राश्च षट्पञ्चाशत्पुराणि च ॥५३॥

[बोधिनीकला]

तत्त्वानि सप्त बोधिन्या तच्चतुर्धा पुराणि च ।

---

49 *cf.* TaĀl$_{\text{KSTS}}$ 11.8; *cit.* TaĀlViv$_{\text{KSTS}}$ 11.8:*a* **50a** *cit.* SvaTaUd$_{\text{KSTS}}$ 10.3b–5:*a* **50ab** paraphrase TaĀl$_{\text{KSTS}}$ 8.325; *cit.* TaĀlViv$_{\text{KSTS}}$ 8.325:*a*; *cit.* SvaTaUd$_{\text{KSTS}}$ 11.30ab:*a* **50cd–51ab** *cit.* PaTriViv$_{\text{KSTS}}$ 5–8ab:*s* **50cd–57** paraphrase TaĀl$_{\text{KSTS}}$ 11.51–53; *cit.* TaĀlViv$_{\text{KSTS}}$ 11.51cd–53:*d*; on पदाध्वन् *cf.* TaĀl$_{\text{KSTS}}$ 16.132–135ab; *cf.* SvaTa$_{\text{KSTS}}$ 4.243–244

Codd: K$_1$ K$_2$ K$_3$ K$_4$ $\simeq$ K$_{\text{ED}}$; B V J G P = α; B V J = β; G P = γ

49c प्रोक्तम्] K$_{\text{ED}}$BGV *TaĀlViv*$_{\text{KSTS}}$; प्रोक्तः J **49d एतद्**] K$_{\text{ED}}$-BGV *TaĀlViv*$_{\text{KSTS}}$; प्रेतद् J **50b पृथक्पृथक्**] K$_{\text{ED}}$$\alpha$; पृथग द्वयम् *SvaTaUd*$_{\text{KSTS}}$ *TaĀlViv*$_{\text{KSTS}}$ **50c आद्यं**] K$_{\text{ED}}$$\alpha$ *TaĀlViv*$_{\text{KSTS}}$; आद्य° *PaTrīViv*$_{\text{KSTS}}$ **50d तत्रैकं**] K$_{\text{ED}}$BGV *PaTrīViv*$_{\text{KSTS}}$ *TaĀlViv*$_{\text{KSTS}}$; तंत्रैकं J **51a पृथक्क्षार्णं**] K$_{\text{ED}}$B^{mg}GV *PaTrīViv*$_{\text{KSTS}}$ *TaĀlViv*$_{\text{KSTS}}$; पृथक्पार्णं B, पृथक्यार्णं J **51d °पुरोत्तमम्**] K$_{\text{ED}}$BGJ *TaĀlViv*$_{\text{KSTS}}$; °पुरोत्त⟨म⟩म् V **53a °विंशत्यबादीनि**] K$_{\text{ED}}$B^{mg}G *TaĀlViv*$_{\text{KSTS}}$; °विंशत्यपादीनि β **53b तद्वद्वाद्य°**] G; तद्वट्टाद्य° K$_{\text{ED}}$B^{mg}, तद्वद्वाद्य° β, तद्वट्टाद्य° *TaĀlViv*$_{\text{KSTS}}$ **54a बोधिन्या**] K$_{\text{ED}}$$\beta$ *TaĀlViv*$_{\text{KSTS}}$; बोधिन्यां G

तृतीये सप्त वर्णाः स्युः पदमन्त्रद्वयं द्वयम् ॥५४॥

[उत्पूयिनीकला]

उत्पूयिन्या चतुर्थं तु तत्र तत्त्वत्रयं विदुः ।
वर्णत्रयं मन्त्रमेकं पदमेकं च लक्षयेत् ॥५५॥
अष्टादश विजानीयाद्भुवनानि समासतः ।

[अवकाशदाकला]

शिवतत्त्वं परं शान्तं कला तत्रावकाशदा ॥५६॥
स्वरषोडशकं मन्त्रं पदं चैकं विलक्षयेत् ।
इत्येवं षडिवधोऽप्यध्वा समासात्परिकीर्तितः ॥५७॥
शुद्धाशुद्धं जगत्सर्वं ब्रह्माण्डप्रभवं यतः ।
तस्माच्छुद्धमिमैः शुद्धैर्ब्रह्माण्डैः सर्वमिष्यते ॥५८॥
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्चेति सुव्रते ।
पृथगेतेषु बोद्धव्यं शान्तं पतिचतुष्टयम् ॥५९॥

Codd: $K_1\, K_2\, K_3\, K_4 \simeq K_{ED}$; B V J G P = α; B V J = β; G P = γ

54c **तृतीये**] K_{ED}BGV *TaĀlViv*$_{KSTS}$; तृतीयं J 54d **°मन्त्र°**] K_{ED}-B^{mg}GVJ *TaĀlViv*$_{KSTS}$; °वर्ण° B ♦ **°द्वयं द्वयम्**] $K_{ED}\alpha$; °द्वयद्वयम् *TaĀlViv*$_{KSTS}$ 55a **उत्पूयिन्या**] K_{ED}G *TaĀlViv*$_{KSTS}$; उत्पूचित्या B-V, तत्प्रचित्यां J ♦ **तु**] K_{ED}G *TaĀlViv*$_{KSTS}$; च β 55c **मन्त्रम्**] K_{ED}BGV *TaĀlViv*$_{KSTS}$; मत्रम् J 55d **लक्षयेत्**] K_{ED}BGV *TaĀlViv*$_{KSTS}$; लक्षयत् J 57b **पदं चैकं**] K_{ED}G *TaĀlViv*$_{KSTS}$; पदादेकं β 58b **ब्रह्माण्डप्रभवं**] K_{ED}BJ; ब्रह्माण्डं प्रभवं B^{mg}GV 59c **बोद्धव्यं**] K_{ED}GJ; *omitted* V 59d **पति°**] $K_{ED}\beta$; परि° G

55c A correct *[ga]ra-vipulā* form (-‐-⏑-⏑-‐-). 58c *Cf.* note to 2.4c.
59b **च ईश्वरश्** :: Absence of *sandhi metri causa*.

योहि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्व उच्यते ।
एतत्ते कथितं सर्वं किमन्यत्परिपृच्छसि ॥६०॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे
व्याप्त्यधिकारो द्वितीयः
समाप्तः

60ab *cit.* SvāSūSaṃVṛ VP 3.11; = $TaĀl_{KSTS}$ 9.310ab; ≈ $MāViVār_{H}$ 213ab; *cit.* $TaĀlViv_{KSTS}$ 2.1:*a*, 5.156cd–157:*a*, 8.23cd–24ab:*intro*; *cit.* $SāmPañ_{KS}$ 9:*a*; *cit.* $MatPārVṛ_{BH}$ VP 5.8:*a*; *cf.* $KirTa_{G}$ 7.25ab: गुणाधिक्यात्परः प्रोक्तः विभुत्वेऽप्युपचर्यते

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

60b **उच्यते**] K_{ED}BGV $TaĀl_{KSTS}$ $TaĀlViv_{KSTS}$ 2.1:*a*; तच्यते J, इष्यते $SāmPañ_{KS}$ $TaĀlViv_{KSTS}$ 5.156cd–157:*a*, 8.23cd–24ab:*intro*

Explicit 2 । इति श्रीमालिनीविजये व्याप्त्यधिकारो नाम द्वितीयाधिकारः २ B; इति श्रीमालिनीविजयोत्तरे व्याप्त्यधिकारो द्वितीयः थइन्स्पचे २। G; । इति श्रीमालिनीविजये व्याप्त्यधिकारो द्वितीयः थइन्स्पचे २। V; इति श्रीमालिनीविजये व्याप्त्यधिकारो द्वितीयोऽध्यायः J.

3

एवमुक्ता महादेवी जगदानन्दकारिणा ।
प्रणिपत्य पुनर्वाक्यमिदमाह जगत्पतिम् ॥१॥
[देव्युवाच]
एवमेतन्महादेव नान्यथा समुदाहृतम् ।
यथाख्यातं तथा ज्ञातमादितः समनुक्रमात् ॥२॥
शिवादिवस्तुरूपाणां वाचकान्परमेश्वर ।
सांप्रतं श्रोतुमिच्छामि प्रसादाद्वक्तुमर्हसि ॥३॥
इत्युक्तः स महेशान्या जगदार्तिहरो हरः ।
वाचकानवदन्मन्त्रान्पारम्पर्यक्रमागतान् ॥४॥
[भैरव उवाच – इच्छा°, ज्ञान°, क्रियाशक्तयः]
या सा शक्तिर्जगद्धातुः कथिता समवायिनी ।

Adhikāra 3 *cit.* NeTaUd$_{\text{KSTS}}$ 1.22cd–31ab:*f* **5–6ab** *cit.* TaĀlViv$_{\text{KSTS}}$ 1.68cd:*a* **5–10ab** *cit.* ViBhaiKau$_{\text{KSTS}}$ 132:*a* **5–15** *cit.* ŚiSūVim$_{\text{S}}$ 3.19:*a*, *cit.* SpaNi$_{\text{KSTS}}$ 3.13:*b* **5a** *cit.* ŚiSūVim$_{\text{KSTS}}$ 1.22:*a* **5ab** *cit.* TaĀlViv$_{\text{KSTS}}$ 1.2:*a*, 11.72–73ab:*a*; *cit.* VāmMaViv$_{\text{KSTS}}$ 1.1:*b* ∆ SvāSūSaṃ$_{\text{VE}}$ 5.4ab: सा शक्तिर्देवदेवस्य तया व्याप्तम् इदं जगद्

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G = α; B V J = β; G = γ

Adhikāra 3.1a **उक्ता**] K_{ED}BGV; उक्ता J **1b** **°कारिणा**] K_{ED}BGJ; °कारिणी V **1d** **इदम्**] K_{ED}BGV; इहम् J **2c** **ज्ञातम्**] K_{ED}B-J; ज्ञानम् G, ज्ञातंम् V **3b** **वाचकान्**] K_{ED}GB^{pc}; वाचकात् B^{ac}VJ **3d** **प्रसादाद्**] $K_{ED}^{pc}$$\beta$G; प्रसदाद् K_{ED}^{ac} **4a** **स महेशान्या**] K_{ED}BVG; समदेशात्या J **4b** **हरः**] K_{ED}BGJ; ह⟦रि⟧रः V **4d** **°क्रमागतान्**] $K_{ED}$$\beta$; °क्रमागताम् G

Incipit 3 With the exception of P (lacking up to 3.60) all witnesses indicate the beginning of a new chapter अथ तृतीयोऽधिकरः K_{ED}; श्रीगुरुभ्यो नमः J. **1b** **°कारिणा** :: *Cf.* 12.1d.

इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते ॥५॥
सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु ।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् ॥६॥
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते ।
एवंभूतमिदं वस्तु भवत्विति यदा पुनः ॥७॥
जाता तदैव तत्तद्वत्कुर्वत्यत्र क्रियोच्यते ।
एवमेषा द्विरूपापि पुनर्भेदैरनन्तताम् ॥८॥
अर्थोपाधिवशाद्याति चिन्तामणिरिवेश्वरी ।

6ab *cit.* MāViVār$_{K}$ 94cd: सैवैका सत्यनेकत्वं... **6cd–7ab** *cit.* NeTaUd$_{KSTS}$ 1.22cd–31ab:*g* **6cd–8ab** *cit.* ĪPraVivVim$_{KSTS}$ 3.1.1:*n* **7cd–8ab** *cit.* SvaTaUd$_{KSTS}$ 11.58–59:*a*; NeTaUd$_{KSTS}$ 1.22cd–31ab:*h* **8cd–9ab** *cit.* TaĀlViv$_{KSTS}$ 1.68cd:*b* **9ab** ≈ BhaiMaṅ$_{NAK}$ 1.56; *cf.* SvāSūSaṃ$_{VE}$ 5.5cd; *cf.* SarSroSaṃSā (*cit.* MṛgTaVṛ$_{KSTS}$ 3.41–42)

Codd: K$_{1}$ K$_{2}$ K$_{3}$ K$_{4}$ ≃ K$_{ED}$; B V J G = α; B V J = β; G = γ

5c देवि] K$_{ED}$$\alpha$ *ŚiSūVim*$_{KSTS}$ *SpaNi*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; देवी *NeTaUd*$_{KSTS}$ *SpaNi*$_{KSTS}$ **7cd वस्तु भवत्विति**] α *ĪPraVivVim*$_{KSTS}$ *SvaTaUd*$_{KSTS}$ *NeTaUd*$_{KSTS}$ *ŚiSūVim*$_{KSTS}$; सर्वमिति कार्योन्मुखी *SpaNi*$_{KSTS}$ *SpaPra*$_{KSTS}$ *ViBhaiKau*$_{KSTS}$ **8a तत्तद्वत्**] K$_{ED}$G *ĪPraVivVim*$_{KSTS}$ *ŚiSūVim*$_{KSTS}$ *SvaTaUd*$_{KSTS}$ *NeTaUd*$_{KSTS}$ *ViBhaiKau*$_{KSTS}$; त⟨त्⟩कर्तुं B, तत्रत्त V, त⁅क्र⁆ तु J, तद्वस्तु *SpaNi*$_{KSTS}$ **8b कुर्वत्य्**] K$_{ED}$ *ĪPraVivVim*$_{KSTS}$ *ŚiSūVim*$_{KSTS}$ *SpaNi*$_{KSTS}$ *SvaTaUd*$_{KSTS}$ *NeTaUd*$_{KSTS}$; कुर्चत्य् G, कुर्वन्त्य् β ♦ क्रियोच्यते] K$_{ED}$BGJ *ĪPraVivVim*$_{KSTS}$ *ŚiSūVim*$_{KSTS}$ *SpaNi*$_{KSTS}$ *SvaTaUd*$_{KSTS}$ *NeTaUd*$_{KSTS}$; ⁅क्र⁆योच्यते V, क्रिया मता *ViBhaiKau*$_{KSTS}$ **8c एवमेषा द्विरूपापि**] K$_{1}$B *SpaNi*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; एवं सैषा द्विरूपापि K$_{ED}$ *ŚiSūVim*$_{KSTS}$, एवं सेषा द्विरूपापि G, एव सेषा द्विरूपापि V, एवमैषा द्विरूपापि J, एवं यथा द्विरूपैव *ViBhaiKau*$_{KSTS}$ **8d अनन्तताम्**] K$_{1}$$\beta$G *ŚiSūVim*$_{S}$ *SpaNi*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; अनेकताम् K$_{ED}$, अनेकधा *ViBhaiKau*$_{KSTS}$ **9a याति**] α *SpaNi*$_{KSTS}$ *TaĀlViv*$_{KSTS}$ *ViBhaiKau*$_{KSTS}$; प्राप्ता *ŚiSūVim*$_{S}$

[मातृभावम्]

तत्र तावत्समापन्ना मातृभावं विभिद्यते ॥९॥
द्विधा च नवधा चैव पञ्चाशद्धा च मालिनी ।
बीजयोन्यात्मकाद्भेदाद्द्विधा बीजं स्वरा मताः ॥१०॥
कादिभिश्च स्मृता योनिर्नवधा वर्गभेदतः ।
पृथग्वर्णविभेदेन शतार्धकिरणोज्ज्वला ॥११॥

[बीजं योनिश्च]

बीजमत्र शिवः शक्तिर्योनिरित्यभिधीयते ।
वाचकत्वेन सर्वापि शंभोः शक्तिश्च शस्यते ॥१२॥

9–11 *cf.* SvāSūSaṃ$_{\text{VE}}$ 5.1–3 **9c–29** *cf.* TaĀl$_{\text{KSTS}}$ 11.72–74ab **9cd** *cit.* TaĀlViv$_{\text{KSTS}}$ 11.72–73ab:*b* **10cd–11a** *cit.* PaTriVi$_{\text{S}}$ p. 50^{2425} **11bcd** *cit.* TaĀlViv$_{\text{KSTS}}$ 3.198–200ab:*a* **11c** *cf.* TaĀl$_{\text{KSTS}}$ 3.199d: पृथग्वर्गस्वरूपिणी **12a** *cit.* TaĀlViv$_{\text{KSTS}}$ 15.125cd–126ab, PaTriVi$_{\text{S}}$ p. 50^{22} **12cd** *cit.* TaĀlViv$_{\text{KSTS}}$ 15.133cd–134ab

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G = α; B V J = β; G = γ

9c समापन्ना] α *SpaNi*$_{\text{KSTS}}$ *TaĀlViv*$_{\text{KSTS}}$ *ViBhaiKau*$_{\text{KSTS}}$; समापन्न° *ŚiSūVim*$_{\text{S}}$ **9d मातृभावं**] α *SpaNi*$_{\text{KSTS}}$ *TaĀlViv*$_{\text{KSTS}}$ *ViBhaiKau*$_{\text{KSTS}}$; मातृभावा *ŚiSūVim*$_{\text{S}}$ **10a चैव**] α *ŚiSūVim*$_{\text{KSTS}}$ *SpaNi*$_{\text{KSTS}}$; भेदैः *ViBhaiKau*$_{\text{KSTS}}$ **10b पञ्चाशद्धा**] K_{ED}BG^{vl} *SpaNi*$_{\text{KSTS}}$ *ViBhaiKau*$_{\text{KSTS}}$; पञ्चाशद्भिश् β, पञ्चाशद्वा *ŚiSūVim*$_{\text{S}}$ **10d द्विधा**] K^{pc}_{ED}BGJ *PaTriViv*$_{\text{S}}$ *ŚiSūVim*$_{\text{KSTS}}$ *SpaNi*$_{\text{KSTS}}$; विधा K^{ac}_{ED}V ♦ **मताः**] K_{ED}BGJ *PaTriViv*$_{\text{S}}$ *ŚiSūVim*$_{\text{KSTS}}$ *SpaNi*$_{\text{KSTS}}$; मता V **11a कादिभिश्**] α *PaTriViv*$_{\text{S}}$ *ŚiSūVim*$_{\text{KSTS}}$; कादयश् *SpaNi*$_{\text{KSTS}}$ **11c पृथग्वर्णविभेदेन**] βG *ŚiSūVim*$_{\text{S}}$ *SpaNi*$_{\text{KSTS}}$ *TaĀlViv*$_{\text{KSTS}}$; प्रतिवर्णविभेदेन K_{ED} **12a बीजमत्र शिवः**] $K_{\text{ED}}\beta$ *PaTriViv*$_{\text{S}}$ *ŚiSūVim*$_{\text{KSTS}}$ *SpaNi*$_{\text{KSTS}}$ *TaĀlViv*$_{\text{KSTS}}$; बीजमन्त्रशिवः G **12cd** *omitted* *ŚiSūVim*$_{\text{S}}$ *SpaNi*$_{\text{KSTS}}$

[वर्गाष्टकम्]

वर्गाष्टकमिह ज्ञेयमघोराद्यमनुक्रमात् ।
तदेव शक्तिभेदेन माहेश्वर्यादि चाष्टकम् ॥१३॥

[अष्टमातृकाः]

माहेशी ब्राह्मणी चैव कौमारी वैष्णवी तथा ।
ऐन्द्री याम्या च चामुण्डा योगीशी चेति ता मताः ॥१४॥
शतार्धभेदभिन्नानां तत्संख्यानां वरानने ।
रुद्राणां वाचकत्वेन कल्पिताः परमेष्ठिना ॥१५॥
तद्वदेव च शक्तीनां तत्संख्यानामनुक्रमात् ।
सर्वं च कथयिष्यामि तासां भेदं यथा शृणु ॥१६॥

---

14 *cf.* TaĀl$_{KSTS}$ 33.3; ∆ BhaiMaṅ$_{NAK}$ 1.11: ब्रह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही चैव माहेन्द्री चामुण्डा बहुरूपिणी; ∆ ManBhaiTa$_{NAK}$ 75

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

---

13 *reduced to a single hemistich:* वर्गाष्टकविभेदेन माहेश्वर्यादि चाष्टकं *ŚiSūVim$_S$* 13a **वर्गाष्टकम्**] K_{ED}BGJ *SpaNi$_{KSTS}$*; वर्णगर्गाष्टकम् V ♦ **इह**] α; इति *SpaNi$_{KSTS}$* 13b **अघोराद्यम्**] K_{ED}BGJ; अघोराद्य⟨म्⟩ V[mg] ♦ **अनुक्रमात्**] K_{ED}BGJ; ⟨अ⟩नुक्रमात् V 13d **चाष्टकम्**] K_{ED}G; वाष्टकम् β, ⟨छा⟩ष्टकं B[vl] 14 *omitted* *ŚiSūVim$_S$* *SpaNi$_{KSTS}$* 14d **योगीशी**] K_{ED}V; योगेशी BGJ 15a **°भिन्नानां**] α; भिन्ना च *SpaNi$_{KSTS}$* 15ab **शतार्धभेदभिन्नानां तत्संख्यानां वरानने**] $K_{ED}\alpha$; प्रतिवर्णविभेदेन शतार्धकरणोज्ज्वला *ŚiSūVim$_S$* 15cd–16ab *reduced to one hemistich:* रुद्राणां वाचकत्वेन तत्संख्यानां निवेशिता *ŚiSūVim$_S$* 15d **कल्पिताः**] K_{ED}V; कल्पिता BGJ *SpaNi$_{KSTS}$* 16b **°संख्यानाम्**] GVJ; °संख्यानम् K_{ED}-B 16c **सर्वं च कथयिष्यामि**] K_{ED}V; ⟨वाचकान्कथयिष्यामि⟩ B, सर्वं च ⟨कथयिष्या⟩मि G, ⟨७⟩मि V, ⟨तव स्नेहात्प्रवक्ष्या⟩मि J 16d **भेदं**] K_{ED}G; ⟨तासाम्तेषां⟩ B, ⟨२⟩ V, ⟨शक्तीर⟩ J

[षोडश बीजोद्भवरुद्राः]

अमृतोऽमृतपूर्णश्च अमृताभोऽमृतद्रवः ।
अमृतौघोऽमृतोर्मिश्च अमृतस्यन्दनोऽपरः ॥१७॥
अमृताङ्गोऽमृतवपुरमृतोद्गार एव च ।
अमृतास्योऽमृततनुस्तथा चामृतसेचनः ॥१८॥
तन्मूर्तिरमृतेशश्च सर्वामृतधरोऽपरः ।
षोडशैते समाख्याता रुद्रबीजसमुद्भवाः ॥१९॥

[चतुस्त्रिंशद्योनिसमुद्भवरुद्राः]

जयश्च विजयश्चैव जयन्तश्चापराजितः ।
सुजयो जयरुद्रश्च जयकीर्तिर्जयावहः ॥२०॥

17–19 paraphrased at TaĀl$_{KSTS}$ 33.11–12 (read स्त्रीपाठाच् for श्रीपाठाच् at 33.12c); *cit.* TaĀlViv$_{KSTS}$ 33.2–17ab:*g* **20–24ab** paraphrased at TaĀl$_{KSTS}$ 33.14cd–17ab; *cit.* TaĀlViv$_{KSTS}$ 33.2–17ab:*i*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

17b अमृताभो] $K_{ED}\beta$ *TaĀlViv*$_{KSTS}$; अमृतार्णओ G **17d अमृतस्यन्दनो**] K_{ED} *TaĀlViv*$_{KSTS}$, अमृतः स्यन्दनः G; अमृतस्यन्दनः β **18c अमृतास्यो**] α *TaĀlViv*$_{KSTS}$; [अमृत]वक्त्र *TaĀl*$_{KSTS}$ **18d तथा चामृतसेचनः**] $K_{ED}\alpha$; तथानिमृतसेचनः B[pc], तथामृतनिषेचनः *TaĀlViv*$_{KSTS}$ **19a अमृतेशश्**] K_{ED}BG *TaĀlViv*$_{KSTS}$; अमरेशश् VJ **19b सर्वामृतधरोऽपरः**] $K_{ED}\alpha$; सर्वामृतधरस्तथा *TaĀlViv*$_{KSTS}$ **20–22ab** B[mg] **20b चापराजितः**] α *TaĀlViv*$_{KSTS}$; °अजित° *TaĀl*$_{KSTS}$ 33.14c **20c सुजयो**] K_{ED}B[vl] *TaĀlViv*$_{KSTS}$; आजयो G, अजयो β ♦ **जयरुद्रश्**] K_{ED}G *TaĀlViv*$_{KSTS}$; जयभद्रश $K_1\beta$ **20d–23b** marked omission V **20d जयकीर्तिर्जयावहः**] K_{ED}BJ *TaĀlViv*$_{KSTS}$; जयकीर्तिजयावहः G

17ab च अमृताभो :: absence of *sandhi (metri causa)*. **17cd च अमृतस्यन्दनो** :: absence of *sandhi (metri causa)*.

जयमूर्तिर्जयोत्साहो जयदो जयवर्धनः ।
बलश्चातिबलश्चैव बलभद्रो बलप्रदः ॥२१॥
बलावहश्च बलवान्बलदाता बलेश्वरः ।
नन्दनः सर्वतोभद्रो भद्रमूर्तिः शिवप्रदः ॥२२॥
सुमनाः स्पृहणो दुर्गो भद्रकालो मनोनुगः ।

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G = α; B V J = β; G = γ

21–23ab different verse order: 21ab, 21c–22b missing, 23ab, थापराजितः कालतोरण, 22cd G^{mg} **21b जयवर्धनः**] K_{ED} *TaĀlViv*$_{KSTS}$; ⟨जयवर्धना⟩ घ^{mg}, ⟨जयवर्धनः⟩ J **21c–23b** marked omission J **21c चातिबलश्**] α *TaĀlViv*$_{KSTS}$; °सुबल° *TaĀl*$_{KSTS}$ 33.15b **21d बलप्रदः**] α *TaĀlViv*$_{KSTS}$; [बल]द° *TaĀl*$_{KSTS}$ 33.15b **22b बलेश्वरः**] α *TaĀlViv*$_{KSTS}$; बलेश *TaĀl*$_{KSTS}$ 33.15c **22c नन्दनः**] K_{ED}B *TaĀlViv*$_{KSTS}$; ⟨नन्दनः⟩ घ^{mg} ♦ **सर्वतोभद्रो**] K_{ED}B *TaĀlViv*$_{KSTS}$; ⟨सर्वतोभद्रः⟩ घ^{mg}, समभद्र° *TaĀl*$_{KSTS}$ 33.15d **22d भद्रमूर्तिः**] K_{ED}B *TaĀlViv*$_{KSTS}$; ⟨भद्रमूर्तिः⟩ घ^{mg} ♦ **शिवप्रदः**] K_{ED}B *TaĀlViv*$_{KSTS}$; ⟨शिवप्रदः⟩ घ^{mg}, शिवद° *TaĀl*$_{KSTS}$ 33.16a **23a सुमनाः**] K_{ED}B^{mg}; ⟨सुमनः⟩ घ^{mg} ♦ **स्पृहणो**] K_{ED}B^{mg}; ⟨स्पृहणका⟩ घ^{mg} ♦ **दुर्गो**] K_{ED}B^{mg}; ⟨दुर्गो⟩ घ^{mg} **23b भद्रकालो**] K_{ED}B^{mg} *TaĀlViv*$_{KSTS}$; ⟨भद्राख्य⟩ घ^{mg} ♦ **मनोनुगः**] K_{ED}B^{mg}; थापराजितः कालतोरण G *cf.* 20b, चेतोऽनुग° *TaĀl*$_{KSTS}$ 33.16c, मनोऽनुगः *TaĀlViv*$_{KSTS}$

22a A correct *rana-vipulā* form. **22** In the top margin: तन्त्रालोके आ 33[.14cd–17ab] जयविजयजयन्ताजितसुजयजयरुद्रकीर्तिनावहकाः ⟨|⟩ तद्वन्मूर्त्युत्साहादवर्धना⟨श्⟩ च बलसुबलभद्रदावहकाः ⟨|⟩ तद्वान्दाता *eo* नन्दनरसभद्रतन्मूर्तिः ⟨|⟩ शिवदसुमनःस्पृहणका दुर्गो भद्राख्यकालश्च ⟨|⟩**तोरण**कौशिककालविश्वसुशिवास्तथापरो **रोषः** ⟨|⟩ श्रुत्यग्न्यरे स्यु⟨रे⟩ते स्त्रीपाठाच्छक्तयस्त्वेताः ॥ G.

कौशिकः कालविश्वेशौ सुशिवः कोपवर्धनः ॥२३॥
एते योनिसमुद्भूताश्चतुस्त्रिंशत्प्रकीर्तिताः ।
स्त्रीपाठवशमापन्ना एत एवात्र शक्तयः ॥२४॥
बीजयोनिसमुद्भूता रुद्रशक्तिसमाश्रयाः ।
वाचकानामनन्तत्वात्परिसंख्या न विद्यते ॥२५॥

[सर्वशास्त्राणां संभवः]

सर्वशास्त्रार्थगर्भिण्या इत्येवंविधयानया ।
अघोरं बोधयामास स्वेच्छया परमेश्वरः ॥२६॥
स तया संप्रबुद्धः सन्योनिं विक्षोभ्य शक्तिभिः ।
तत्समानश्रुतीन्वर्णांस्तत्संख्यानसृजत्प्रभुः ॥२७॥
ते तैरालिङ्गिताः सन्तः सर्वकामफलप्रदाः ।
भवन्ति साधकेन्द्राणां नान्यथा वीरवन्दिते ॥२८॥
तैरिदं संततं विश्वं सदेवासुरमानुषम् ।

---

26 *cit.* PaTriVi$_{\text{S}}$ p. 72^{45} **27** *cit.* PaTriVi$_{\text{S}}$ p. 72^{78} **27–28ab** *cit.* TaĀlViv$_{\text{KSTS}}$ 16.210–216ab:*a* **27–28** *cit.* TaĀlViv$_{\text{KSTS}}$ 11.72–73ab:*c* **28** *cit.* PaTriVi$_{\text{S}}$ p. 72$^{10-11}$ **28a** = TaĀl$_{\text{KSTS}}$ 16.211d

---

Codd: K$_1$ K$_2$ K$_3$ K$_4$ $\simeq$ K$_{\text{ED}}$; B V J G = α; B V J = β; G = γ

23c **°विश्वेशौ**] α *TaĀlViv*$_{\text{KSTS}}$; °विश्व° *TaĀl*$_{\text{KSTS}}$ 33.16d 23d **सुशिवः**] K$_{\text{ED}}$GVJB^{pc} *TaĀlViv*$_{\text{KSTS}}$; सुशिखः B^{ac} ♦ **कोपवर्धनः**] α; कोप एव च K$_{\text{ED}}$ *TaĀlViv*$_{\text{KSTS}}$ 24b **प्रकीर्तिताः**] K$_{\text{ED}}$GV *TaĀlViv*$_{\text{KSTS}}$; प्रकीर्तितः J 24c **स्त्रीपाठवशम्**] K$_{\text{ED}}$BGV; स्त्रीपाटं वसम् J 25b **°समाश्रयाः**] K$_{\text{ED}}$BV; °समाश्रया G, °समाश्रया⟨:⟩ J^{mg} 26a **सर्व°**] K$_{\text{ED}}$BGJ *PaTriViv*$_{\text{S}}$; सवो° V 26b **एवंविधयानया**] K$_{\text{ED}}$$\beta$G; एवं विधयानया *PaTriViv*$_{\text{S}}$ 27a **सन्**] K$_{\text{ED}}$BGV *PaTriViv*$_{\text{S}}$ *TaĀlViv*$_{\text{KSTS}}$; सत् J 27b **विक्षोभ्यशक्तिभिः**] K$_{\text{ED}}$$\beta$ *PaTriViv*$_{\text{S}}$ *TaĀlViv*$_{\text{KSTS}}$; विक्षोभिशक्तिभिः G 28a **ते तैर्**] K$_{\text{ED}}$$\beta$ *TaĀl*$_{\text{KSTS}}$ *TaĀlViv*$_{\text{KSTS}}$ 16.211cd–216ab:*a*; तैस्तैर् K$_1$G *PaTriViv*$_{\text{S}}$ *TaĀlViv*$_{\text{KSTS}}$ 11.72–72ab:*c*

तेभ्यः शास्त्राणि वेदाश्च संभवन्ति पुनः पुनः ॥२९॥

[अघोराः, घोराः, घोरतर्यः]

अनन्तस्यापि भेदस्य शिवशक्तेर्महात्मनः ।
कार्यभेदान्महादेवि त्रैविध्यं समुदाहृतम् ॥३०॥
विषयेष्वेव संलीनानधोऽधः पातयन्त्यणून् ।
रुद्राणून्याः समालिङ्ग्य घोरतर्योऽपराः स्मृताः ॥३१॥
मिश्रकर्मफलासक्तिं पूर्ववज्जनयन्ति याः ।
मुक्तिमार्गनिरोधिन्यास्ताःस्युर्घोराः परापराः ॥३२॥
पूर्ववज्जन्तुजातस्य शिवधामफलप्रदाः ।
पराः प्रकथितास्तज्ज्ञैरघोराः शिवशक्तयः ॥३३॥
एताः सर्वाणुसंघातमपि निष्ठा यथा स्थिताः ।
तथा ते कथिताः शंभोः शक्तिरेकैव शाङ्करी ॥३४॥

30–34 ∆ SiYoMa$_{T}$ 2.23–31; *cf.* NeTa$_{KSTS}$ 19.159–160 with Uddyota, PañArPra *cit.* SvaTaUd$_{KSTS}$ 1.41–43:*b* **31** *cit.* TaĀlViv$_{KSTS}$ 3.103cd–104ab:*a* **31–33** *cit.* SvaTaUd$_{KSTS}$ 1.41–43:*a*, SpaNi$_{KSTS}$ 3.13:*b*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G = α; B V J = β; G = γ

29c शास्त्राणि] K_{ED}BGV; शस्त्राणि J **31d घोरतर्योऽपराः**] K_{ED}-*SpaNi*$_{KSTS}$ *SvaTaUd*$_{KSTS}$; घोरतर्यः परास् BGV, घोरतर्यः पराः J ♦ **स्मृताः**] K_{ED}J *SvaTaUd*$_{KSTS}$; तु ताः > स्मृताः घ^{mg}, तु ताः BV *SpaNi*$_{KSTS}$ *TaĀlViv*$_{KSTS}$ **32a °फलासक्तिं**] K_{ED}B^{vl}GV *SpaNi*$_{KSTS}$ *SvaTaUd*$_{KSTS}$; °फलाशक्तिं BJ **32c °निरोधिन्यास्**] K_{ED} *SvaTaUd*$_{KSTS}$; °निरोधिन्यस् βG *SpaNi*$_{KSTS}$ **32d परापराः**] K_{ED}BGV *SpaNi*$_{KSTS}$ *SvaTaUd*$_{KSTS}$; परापरा⟨:⟩ J^{pc} **33c प्रकथितास्**] $K_{ED}$$\beta$G *SpaNi*$_{KSTS}$; प्रकाशितास् *SvaTaUd*$_{KSTS}$ **33d अघोराः**] K_{ED}BG *SvaTaUd*$_{KSTS}$; अघोरा V, अघोरा⟨:⟩ J **34b अपि निष्ठा यथा**] K_{ED}G; in square brackets in main text of K_{ED}: निष्ठा[धिष्ठाय] यथा, अधि∗ष्ठा यथा B, अधितिष्ठा यथा V, अधिष्ठा यथा J

[भिन्नयोनिमालिनी]

अस्या वाचकभेदेन भेदोऽन्यः संप्रचक्ष्यते ।
यथेष्टफलसंसिद्ध्यै मन्त्रतन्त्रानुवर्तिनाम् ॥३५॥
विशेषविधिहीनेषु न्यासकर्मसु मन्त्रवित् ।
न्यसेच्छाक्तशरीरार्थं भिन्नयोनिं तु मालिनीम् ॥३६॥

[नादिफान्तक्रमोद्धारः]

न शिखा **ऋॠऌॡ** च शिरोमाला **थ** मस्तकम् ।
नेत्राणि **चध** वै नासा **ई** समुद्रे **णुणू** श्रुती ॥३७॥
बकवर्गइआ वक्त्रदन्तजिह्वासु वाचि च ।

35cd–36 *cit.* TaĀlViv$_{KSTS}$ 15.135cd–137ab:*a* **36** ≈ TaĀl$_{KSTS}$ 15.135d–136b **36d** *cf.* ŚrīMaUttTa$_{NAK}$ Paṭala 7 39r^{8}– 44r^{2} (= GoSaṃ$_{P}$ 6.117–137) for the ध्यानमूर्तिः of Mālinī **37–41b** ≈ TaĀl$_{KSTS}$ 15.121–125cd; ∆ SiYoMa$_{T}$ 3.7cd–18d; ∆ TriŚiBhai (*cit.* TaĀlViv$_{KSTS}$ 15.121–125cd:*c*); ∆ TaSaBhāTa 3.105–128ab; ∆ KubMaTa$_{G}$ 4.82–106, 17.94–109, 18.94–109, 24.20cd–35; ∆ ṢaSāSaṃ$_{SCH}$ 7.6–38, 38.21cd–37; ∆ PārMat$_{V}$ 27.7–37; ∆ KulRatUd$_{NAK}$ 5.84–99; ∆ ŚrīMaUttTa$_{NAK}$ Paṭala 7 (= GoSaṃ$_{P}$ 7.2–64, also ध्यानमूर्तयः at 7.118–342); ∆ AgnKāPad fol. 39v$^{5-7}$, Paris fol. 77v$^{13-16}$; ∆ AgnPu$_{KSS}$ 145.6–18ab

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G = α; B V J = β; G = γ

35a **वाचकभेदेन**] K_{ED}GV; वा⊔चभेदेन J **35b** **भेदो**] K_{ED}BGJ; भेदे V ♦ **संप्रचक्ष्यते**] K_{ED}BGV; संप्रचक्षते J **35d** **मन्त्रतन्त्रा॰**] β-*TaĀlViv*$_{KSTS}$; मन्त्रातन्त्रा॰ K_{ED}, मन्त्र⟨त⟩न्त्रा॰ G **36a** **॰विधिहीनेषु**] $K_{ED}$$\beta$ *TaĀlViv*$_{KSTS}$; ॰वि⟦धी⟧हीनेषु G **36c** **न्यसेच्**] K_{ED}BGJ *TaĀlViv*$_{KSTS}$; न्यस्येच् V ♦ **छाक्त॰**] K_{ED}BGJ *TaĀlViv*$_{KSTS}$; छान्त॰ V **37c** **॰ध**] K_{ED}G; ए β ♦ **वै**] K_{ED}G; ऐर् BJ, ऐ V **37d** **ई समुद्रे**] K_{ED}G; ईषमुद्रे β **38a** **बकवर्ग॰**] K_{ED}B^{vl}V; वकवर्ग॰ BGJ

37a **ऋॠऌॡ** :: metrically incorrect *ra-vipulā* (- ˘ -) preceded by a non-permitted *ja-gaṇa* (˘ - ˘).

वभयाः कण्ठदक्षादिस्कन्धयोभुजयोर्**ड्ढौ** ॥३८॥
ठो हस्तयो**र्झञौ** शाखा **ञ्रटौ** शूलकपालके ।
प हृच**छलौ** स्तनौ क्षीरमा, **स** जीवो विसर्गयुक् ॥३९॥
तत्परः कथितः प्राणः **षक्षाव्**उदरनाभिगौ ।
मशंताः कटिगुह्योरु युग्मगा जानुनी तथा ॥४०॥
एऐकारौ तथा जङ्घे तत्परौ चरणौ **दफौ** ।
अतो विद्याश्च मन्त्राश्च समुद्धार्या यथा शृणु ॥४१॥

[परापराया उद्धारः]

सबिन्दुकां दक्षजङ्घां ततो वाचं प्रकल्पयेत् ।
तयैव जङ्घया युक्तं चतुर्थं दशनं ततः ॥४२॥

42–50 Δ SiYoMa$_{T}$ 3.23–39; *cf.* TaĀl$_{KSTS}$ 30.20–26ab

Codd: K_{1} K_{2} K_{3} K_{4} $\simeq$ K_{ED}; B V J G = α; B V J = β; G = γ

38d **स्कन्धयोर्**] K_{ED}GJ; स्कन्दयोर् V ♦ **भुजयोर्ड्ढौ**] K_{ED}BG; भुजयोस्तडौ V, भुजयोस्तढौ J **39a** **ठो**] K_{ED}G; ठौ B, धौ VJ ♦ **हस्तयोर्**] K_{ED}BGJ; हस्तयौर् V ♦ **झञौ**] K_{ED}^{pc}BG; झजौ K_{ED}^{ac}, दडञौ V, दञौ J **39b** **ञ्रटौ**] K_{ED}G; जजौ β, ठण्य V^{vl} ♦ **°कपालके**] K_{ED}BGJ; °कुपालके V **40a** **तत्परः**] K_{ED}BGJ; त⟦त्क⟧त्परः V **40ab** **प्राणः षक्षाव्**] K_{ED}G; प्राणश्चक्षाव् V, प्राणः शक्षाव् J **40b** **ष**] K_{ED}B^{mg}GVJ; श B **40c** **मशंताः**] K_{ED}GV; मशान्ताः B, प्रशंताः J **40cd** **कटिगुह्योरुयुग्मगा**] K_{ED}G; कटिगुह्योर्थचरुजोर् B, कटिगुह्यर्थचरुजोर् V, कटिगुह्योनूचरुजोर् J **41a** **एऐकारौ**] K_{ED}G; एद्वे B, एऐकारो V, ए द्वे कारौ J ♦ **जङ्घे**] K_{ED}BGJ; जङ्गे V **41b** **दफौ**] K_{ED}BGV; दहौ J **42a** **°जङ्घां**] BGJ; °जङां K_{ED}, °जङ्घां V **42c** **तयैव**] BG; तथैव K_{ED}J, ⟦*⟧तयैव V

39a In top margin of fol. 9^{r} G: न ऋ ॠ ऌ ॡ थ च ध ई ण उ ऊ ब क ख ग घ ङ इ अ व भ य ड ढ ठ ⟨र⟩ * झ ञ ज ⟦र⟧ ट प छ ल आ स अः ह ष क्ष म श अं त ए ऐ ओ औ द फ ह्रीं मालिन्यै नमः. **42a** A correct *[ga]ra-vipulā* (⏑ - - ⏑ - - - - -).

दक्षजानुयुतं दण्डं प्राणं दण्डस्थमीर्युतम् ।
पृथग्घृद्दण्डकटिगा द्विजदण्डौ च पूर्ववत् ॥४३॥
उस्थितं बिन्दुयुक्प्राणं पूर्ववद्दशनं ततः ।
दण्डं केवलमुद्धृत्य वाममुद्रान्वितं पुनः ॥४४॥
दक्षजानुयुतं हृच्च प्राणं जीवात्मना युतम् ।
दशनं पुर्ववन्नयस्य दण्डं केवलमेव च ॥४५॥
नितम्बं दक्षमुद्रेतं द्वितीयं जिह्वया द्विजम् ।
सनासं दक्षशिखरं नितम्बं केवलं ततः ॥४६॥
पुनस्तथैव शिखरं जठरं केवलं ततः ।
दक्षजानुयुतं कर्णं कण्ठं केवलमेव च ॥४७॥
नितम्बं केवलं न्यस्य हृदयं जिह्वया युतम् ।
वक्त्रं केवलमुद्धृत्य प्राणमाद्येन जानुना ॥४८॥
शूलदण्डचतुष्कं च तत्राद्यं द्वयमुस्थितम् ।
वामपादं च तस्यान्ते कपालं पतितं न्यसेत् ॥४९॥

Codd: K_1 K_2 K_3 $K_4 \simeq K_{ED}$; B V J G p = α; B V J = β; G = γ

43a °जानुयुतं] K_{ED}; °जानुयुतान् BGJ, °जानुयुतां V **43b दण्डस्थमीर्युतम्**] K^{pc}_{ED}; दण्डस्थमीयुतम् $K^{ac}_{ED}\beta$G **43c घृद्दण्ड°**] K_{ED}; धृद्दण्ड° BJ, घृदण्ड° G, ⟦घृ⟧घृद्दण्ड° V **44a उस्थितं**] K^{pc}_{ED}V; उत्थितं K^{ac}_{ED}BG, तस्थितं J **44c दण्डं**] K_{ED}BGJ; दण्डं ⟦दक्षजानुयुतां⟧ V **45ab** *unmarked omission* BGJ, **हृद्दक्षजानुसंयुक्तं प्राणं** ⟨6⟩ V^{mg} **46a °मुद्रेतं**] K_{ED}V; °मुद्रैतं BGJ **47a पुनस्**] K_{ED}BGJ; पुनः V **47c कर्णं**] K_{ED}BGJ; क⟦ा⟧र्णं V **48c वक्त्रं**] K_{ED}BGJ; वक्त्र° V **49a °चतुष्कं**] K_{ED}BVJ; °चतुष्के G **49b द्वयमुस्थितम्**] K^{pc}_{ED}; द्वयसंस्थितं K^{ac}_{ED}BGVJ

43c A correct *[gaga]na-vipulā*. **46c** A correct *[gaga]na-vipulā*. **47a** A correct *[ra]na-vipulā*. **49b द्वयमुस्थितम्** :: द्वयसंस्थितं emended (?) to उत्थितम् with square brackets, °उत्थि° corrected to °उस्थि° in the शोधपत्रम् K_{ED}.

ततः परमघोरान्तं पाद्यकाद्ये च पूर्ववत् ।
परापरा समाख्याता अपरा च प्रकथ्यते ॥५०॥

[अपराया उद्धारः]

अघोरान्तं न्यसेदादौ प्राणं बिन्दुयुतं पुनः ।
वाममुद्रान्वितं न्यस्य पाद्यं काद्येन पूर्ववत् ॥५१॥
अपरेयं समाख्याता रुद्रशक्तिं परां शृणु ।

[पराया उद्धारः]

मन्त्राः संमुखतां यान्ति ययोच्चारितमात्रया ॥५२॥
कम्पते गात्रयष्टिश्च द्रुतं चोत्पतनं भवेत् ।
मुद्राबन्धं च गेयं च शिवारुदितमेव च ॥५३॥
अतीतानगतार्थस्य कुर्याद्वा कथनादिकम् ।
वामजङ्घान्वितो जीवः पारम्पर्यक्रमागतः ॥५४॥
परेयमनया सिद्धिः सर्वकामफलप्रदा ।

---

51 *cit.* TaĀlViv$_{\text{KSTS}}$ 30.14cd–28ab:*e* **51–52ab** *cf.* SiYoMa$_{\text{T}}$ 3.40–43; *cf.* TaĀl$_{\text{KSTS}}$ 30.26cd **53ab** ≈ SiYoMa$_{\text{T}}$ 3.49ab **53cd** *cf.* SiYoMa$_{\text{T}}$ 3.51cd **54ab** ≈ SiYoMa$_{\text{T}}$ 3.52cd **54c** *cit.* TaĀlViv$_{\text{KSTS}}$ 5.133cd–134ab:*b* **54cd** *cit.* PaTriVi$_{\text{S}}$ 9cd–18c:*u*; *cf.* TaĀl$_{\text{KSTS}}$ 30.27; TriŚiBhai *cit.* TaĀl$_{\text{KSTS}}$ 30.28cd–36ab **54cd–55ab** *cf.* SiYoMa$_{\text{T}}$ 3.46cd–47ab

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G = α; B V J = β; G = γ

50ab **°घोरान्तं पाद्यकाद्ये**] K_{ED}; °घोरान्तमाद्यकाद्ये BGJ, °घोरा-न्त[[̇]]माद्यकाद्ये V **50b** **च**] K_{ED}GJ; *omitted* V **51c** **°मुद्रान्वितं**] $K_{\text{ED}}\beta$ *TaĀlViv*$_{\text{KSTS}}$; °मुद्रानितं G ♦ **न्यस्य**] K_{ED}G *TaĀlViv*$_{\text{KSTS}}$; तस्य β **51d** **पाद्यं काद्येन**] K_{ED}V *TaĀlViv*$_{\text{KSTS}}$; पाद्यकाद्ये च K_3BGJ **52b** **परां**] $K_{\text{ED}}\beta$; परा G **52d** **°मात्रया**] K_{ED}BGJ; °मा⟨त्र⟩यया V^{mg} **53c** **गेयं**] K_{ED}GVJ; योगम् B **54b** **कुर्याद्**] K_{ED}BGJ; कुर्या[[*]]द् V ♦ **°ादिकम्**] K_{ED}GVJ; आदिदिकम् B **54d** **पारम्पर्य°**] K_{ED}-GJ *PaTriViv*$_{\text{S}}$; [[प्र]]पारम्पर्य° V

नाशिष्याय प्रदेयेयं नाभक्ताय कदा चन ॥५५॥
रुद्रश्च रुद्रशक्तिश्च गुरुश्चेति त्रयं समम् ।
भक्त्या प्रपश्यते यस्तु तस्मै देया वरानने ॥५६॥
शिष्येनापि तदा ग्राह्या यदा संतोषितो गुरुः ।
शरीरद्रव्यविज्ञानशुद्धिकर्मगुणादिभिः ॥५७॥
बोधिता तु यदा तेन गुरुणा हृष्टचेतसा ।
तदा सिद्धिप्रदा ज्ञेया नान्यथा वीरवन्दिते ॥५८॥

[परापराया अङ्गमन्त्राः]

परापराङ्गसंभूता योगिन्योऽष्टौ महाबलाः ।
पञ्च षट्पञ्च चत्वारि द्वित्रिद्व्यर्णाः क्रमेण तु ॥५९॥

55cd–56 *cf.* $\mathrm{SiYoMa_T}$ 3.44–45ab **57–58** *cit.* $\mathrm{PaTriVi_S}$ 9cd–18c:*s* **57ab** = $\mathrm{SiYoMa_T}$ 3.45cd **59–60ab** *cit.* $\mathrm{PaTriVi_S}$ p. 57[23–25], $\mathrm{TaĀlViv_{KSTS}}$ 16.216cd–224ab:*c*, $\mathrm{TaĀlViv_{KSTS}}$ 30.14cd–28ab:*c*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G = α; B V J = β; G = γ

55c प्रदेयेयं] K_{ED}BG; प्रदायेयं VJ **55d कदा**] K_{ED}BG; कथं V, कं J **56b त्रयं समम्**] K_{ED}GVJ; समं त्रयम् B **56d तस्मै**] K_{ED}BGV; तस्यै J ◆ **देया**] K_{ED}^{pc}; देयं $K_{ED}^{ac}\beta$G **57b संतोषितो**] K_{ED}GV *Pa-TriViv$_S$*; संतोशितो J **57d °शुद्धि°**] α; °जाति° *PaTriViv$_S$* **59c षट्पञ्च**] K_{ED}BV *TaĀlViv$_{KSTS}$* *PaTriViv$_S$*; षष्ठां च G, षट्टाञ्च J **59d द्वि-त्रिद्व्यर्णाः क्रमेण तु**] B *TaĀlViv$_{KSTS}$* 30.14cd–28ab:*c*; क्रमेण तु द्वित्रिद्व्यर्णाः K_{ED}V *TaĀlViv$_{KSTS}$* *unmetrical*, क्रमेण तु द्वित्रिवर्णाः G, क्रमेण तु द्वित्रिद्वर्णाः J, द्वित्रिवर्णाः क्रमेण तु *PaTriViv$_S$*

ज्ञेयाः सप्तैकादशार्णा एकार्धार्णद्वयान्विता ।

[विद्यात्रयस्य गात्राणि वक्त्राणि च]

जीवो दीर्घस्वरैः षड्भिः पृथग्जातिविभेदितः ॥६०॥
विद्यात्रयस्य गात्राणि ह्रस्वैर्वक्त्राणि पञ्चभिः ।

[विद्याङ्गानि]

ॐकारैः पञ्चभिर्मन्त्रो विद्याङ्गहृदयं भवेत् ॥६१॥
ॐ अमृते तेजोमालिनि स्वाहापदानि भूषितम् ।
एकादशाक्षरं प्रोक्तमेतद्ब्रह्मशिरः प्रिये ॥६२॥
वेदवेदिनि हूंफच्च प्रणवादिसमन्विता ।
रुद्राण्यष्टाक्षरा ज्ञेया शिखा विद्यागणस्य तु ॥६३॥

60cd–61ab ≈ TaĀl$_{\text{KSTS}}$ 30.36cd–37ab; *cit.* TaĀlViv$_{\text{KSTS}}$ 30.29–64ab:*e* **61cd–62** ∆ SiYoMa$_{\text{T}}$ 4.2cd–4; paraphrase TaĀl$_{\text{KSTS}}$ 30.37cd–38 **63** ≈ SiYoMa$_{\text{T}}$ 4.5; paraphrase TaĀl$_{\text{KSTS}}$ 30.39ab

---

Codd: K$_1$ K$_2$ K$_3$ K$_4$ ≃ K$_{\text{ED}}$; B V J G P[60–] = α; B V J = β; G P[60–] = γ

60a ज्ञेयाः] K$_{\text{ED}}$B^{vl} *PaTriViv*$_{S}$ *TaĀlViv*$_{\text{KSTS}}$; द्वितीया α **60b एकार्धार्णद्वयान्विता**] K$_{\text{ED}}^{pc}$ *TaĀlViv*$_{\text{KSTS}}$ 30.14cd–28ab:*c*; एकार्धार्णद्वयान्विताः K$_{\text{ED}}^{ac}$ *PaTriViv*$_{S}$ *TaĀlViv*$_{\text{KSTS}}$ 16.216cd–224ab:*c*, चैव द्वयान्विता γBV, एकार्धार्ण° B^{vl}, चै⊔⊔वद्धयान्विता J **60d °विभेदितः**] βP; °समन्वितः K$_{\text{ED}}$ *TaĀlViv*$_{\text{KSTS}}$; °विभेदतः K$_1$K$_2$G **61b ह्रस्वैर्**] K$_{\text{ED}}\beta$G *PaTriViv*$_{S}$; हृस्वैर् P ♦ **वक्त्राणि**] K$_{\text{ED}}$BJP *PaTriViv*$_{S}$; चक्राणि G, व⟦ा⟧क्राणि V **61c मन्त्रो**] K$_{\text{ED}}\beta$P; मन्त्रैर् G **62b °पदानि भूषितम्**] K$_{\text{ED}}$BGJ; °पदविभूषितम् K$_{\text{ED}}^{vl}$J **62d ब्रह्मशिरः**] K$_{\text{ED}}$BGJ; ब्रह्मशिर⟨ः⟩ V **63b प्रणवादिसमन्विता**] K$_{\text{ED}}\beta$; प्रणवादियुता शिखा K$_3$G

60a A correct *[ga]ra-vipulā* (- - - - - - ⏑ - - -). **60** marginal additions: जीवः प्राणस्थ एवात्र प्राणो वा जीवसंयुतः G, जीवः प्राणस्थ एवात्र प्राणो वा जीवसंस्थितः P (= TaĀl$_{\text{KSTS}}$ 30.28cd) in Devanāgarī with Śāradā ओमात्राः. **60d → 61b** marginal gloss स्हौः G. **61b → 61d** marginal gloss हृसौः G. **62b अमृते तेजोमालिनि स्वाहा** :: *unmetrical.*

वज्रिणे वज्रधराय स्वाहान्तं प्रणवादिकम् ।
एकादशाक्षरं वर्म पुरुष्टुतमिति स्मृतम् ॥६४॥
श्लींपदं **पशु**शब्दं च **हूंफड**न्तं भवादिकम् ।
एतत्पाशुपतं प्रोक्तमर्धसप्ताक्षरं परम् ॥६५॥

[दिक्पालमन्त्राः]

लरटक्षवयैर्दीर्घैः **सूमा**युक्तैः सबिन्दुकैः ।
इन्द्रादीन्कल्पयेद्ध्रस्वैस्तदस्त्राणि विचक्षणः ॥६६॥
तद्वन्नासापयोभ्यां तु कल्प्यौ विष्णुप्रजापती ।
स्वरावाद्यतृतीयौ तु वाचकौ पद्मचक्रयोः ॥६७॥

---

64 *cf.* SiYoMa$_{T}$ 4.6; *cf.* TaĀl$_{KSTS}$ 30.39cd–40ab **65ab** ≈ SiYoMa$_{T}$ 4.7cd; paraphrase TaĀl$_{KSTS}$ 30.41cd **66–67** paraphrase TaĀl$_{KSTS}$ 30.42–43ab

---

Codd: K$_{1}$ K$_{2}$ K$_{3}$ K$_{4}$ ≃ K$_{ED}$; B V J G P = α; B V J = β; G P = γ

64a वज्रधराय] K$_{ED}$G; वज्रधाराय βP **64d पुरुष्टुतम्**] K$_{ED}$BGV; न्दुरुष्टुतम् J, पुरुष्टतम् P **65a श्लीपदं**] K$_{ED}$GV; श्रीशब्दं BJ, श्लीं B^{vl}, श्लीशब्दं P, श्लशब्दं K$_{3}$ **65b भवादिकम्**] K$_{ED}\alpha$; तारादिकम् *em.*Gnoli *following TaĀl*$_{KSTS}$ 30.41cd **65c प्रोक्तम्**] K$_{ED}\gamma$BJ; प्रोक्त⟦˙⟧म् V **66a दीर्घैः**] α; दीघैः K$_{ED}$ **66b सूमायुक्तैः**] K$^{pc}_{ED}$; सहयुक्तैः K$^{ac}_{ED}$BGJ, स⟨ह⟩युक्तैः V, सहमुक्तैः P, समयुक्तैः *em.* Gnoli, *unaware of* Kaul's *correction in the* शोधपत्रम् **67a नासापयोभ्यां**] K$_{ED}\beta$; नासापयोग्यां γ

64a वज्रधराय :: The variant वज्रधाराय in βP is probably a scribal emendation attempting to restore the *pathyā* form of *anuṣṭubh* since the incorporation of the mantra into the verse violates the meter. **64 → 68** marginal annotation: तारो द्विजिह्वः ꞉खश꞉रस्वरयुज्जीव एव च।नेत्रमेतत्प्रकाशात्मसर्वसाधारणं स्मृतम्। श्लीं पशु ⟨हुं⟩ फट् च तदस्त्रं रसवर्णकम् G(= TaĀl$_{KSTS}$ 30.40cd–41). **65 पाशुपतं** :: तारे द्विजिह्वः खशरस्वरयुग्जीव एव च नेत्रमेतत्प्रकाशत्मसर्वसाधारणं स्मृतम् **श्लीं पशु हुं फड्** च तदस्त्रं रसवर्णकम् P^{mg}.

इति मन्त्रगणः प्रोक्तः सर्वकामफलप्रदः ।
योगिनां योगसिद्ध्यर्थं किमन्यत्परिपृच्छसि ॥६८॥

इति श्रीमालिनीवइजयोत्तरे तन्त्रे
मन्त्रोद्धाराधिकारस्तृतीयः
समाप्तः

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

68a मन्त्रगणः] $K_3\beta$P Gnoli; मातृगणः K_{ED}G **68b °प्रदः**] K_{ED}-γBJ; °प्रद⟦ा⟧ः V

Explicit 3 इति श्रीमालिनीविजयोत्तरे मन्त्रोद्धाराधिकारस्तृतीयः।B; इति श्रीमालिनीविजयोत्तरे मन्त्रोद्धाराधिकारस्तृतीयः॥३ G; इति श्रीमालिनीविजयोत्तरे मन्त्रोद्धाराधिकारस्तृतीयः V; इति श्रीमालिनीविजयोत्तरे मन्त्रोद्धाराधिकारस्तृतीयः सर्गः। J; इति श्रीमालिनीविजयोत्तरे मन्त्रोद्धाराधिकारस्तृतीयः P.

4

अथैतदुपसंश्रुत्य मुनयो मुदितेक्षणाः ।
प्रणम्य क्रौञ्चहन्तारं पुनरूचुरिदं वचः ॥१॥

[ऋषय ऊचुः]

योगमार्गविधिं देव्या पृष्टेन परमेष्ठिना ।
तत्प्रतिज्ञावताप्युक्तं किमर्थं मन्त्रलक्षणम् ॥२॥
एवमुक्तः स तैः सम्यक्कार्तिकेयो महामतिः ।
इदमाह वचस्तेषां संदेहविनिवृत्तये ॥३॥

[कार्तिकेय उवाच– योगलक्षणम्]

योगमेकत्वमिच्छन्ति वस्तुनोऽन्येन वस्तुना ।
यद्वस्तु ज्ञेयमित्युक्तं हेयत्वादिप्रसिद्धये ॥४॥

38c **चिन्तयेच्छत॰**] K_{ED}BγV; चिन्तयेत *unmetrical* J 38d **अधिपत्वम्**] $K_{\mathrm{ED}}\beta$G; अधिषित्वम् P BγJ 39c **योग॰**] K_{ED}B^{pc}GVJP; याग B^{ac} 39d **तत्फलानि**] α *(aiśa form)*; तत्फलानां K_{ED} 40a **योग्यता॰**] $K_{\mathrm{ED}}\beta$G *TaĀl*$_{\mathrm{KSTS}}$ *TaĀlViv*$_{\mathrm{KSTS}}$; योगिता॰ P ♦ **॰वशगा जाता**] K_1BγV; ॰वशसंजाता K_{ED} *TaĀl*$_{\mathrm{KSTS}}$ 22.3a *TaĀlViv*$_{\mathrm{KSTS}}$; ॰वसमाजाता J, ॰वशतो यत्र *TaĀl*$_{\mathrm{KSTS}}$ 15.3c 40b **वासना**] $K_{\mathrm{ED}}\alpha$ *TaĀl*$_{\mathrm{KSTS}}$ 15.3d *TaĀlViv*$_{\mathrm{KSTS}}$; शासना *TaĀl*$_{\mathrm{KSTS}}$ 22.3b 40d **विचक्षणैः**] $K_{\mathrm{ED}}\alpha$ *TaĀlViv*$_{\mathrm{KSTS}}$ ततस्त्वसौ *TaĀl*$_{\mathrm{KSTS}}$ 22.3d 41b **न निवर्तते**] $K_{\mathrm{ED}}\beta$G *TaĀl*$_{\mathrm{KSTS}}$ 22.2d *TaĀlViv*$_{\mathrm{KSTS}}$; ननिनि/वर्तते P, न च्यवते *TaĀl*$_{\mathrm{KSTS}}$ 15.4a

तत्फलं सर्वमासाद्य शिवयुक्तोऽपवृज्यते ॥४१॥
अयुक्तोऽप्यध्वसंशुद्धिं संप्राप्य भुवनेशतः ।
शुद्धः शिवत्वमायाति दग्धसंसारबन्धनः ॥४२॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे
प्रथमधारणाधिकारो द्वादशः
समाप्तः

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

41c तत्फलं सर्वमासाद्य] $K_{ED}\alpha$; फलं सर्व समासाद्य *TaĀl*$_{KSTS}$ **41d शिव°**] $K_{ED}\alpha$; शिवे *TaĀl*$_{KSTS}$ **42a अध्व°**] *em.* SANDERSON; ऊर्ध्व-° $K_{ED}\beta$ *TaĀl*$_{KSTS}$; अर्द्ध° γ ♦ **°संशुद्धिं**] *TaĀl*$_{KSTS}$; °संशुद्धि° $K_{ED}\alpha$ **42b संप्राप्य** *TaĀl*$_{KSTS}$; **संप्राप्त°** K_{ED}, **संप्राप्ति°** α **42c शुद्धः**] *TaĀl*$_{KSTS}$; शुद्धाच् $K_{ED}\beta$G; शुद्धा P **42d °बन्धनः**] $K_{ED}\beta$ *TaĀl*$_{KSTS}$; °बन्धनाः γ

Explicit 12 इति श्रीमालिनीविजयोत्तरे तन्त्रे प्रथमधारणाधिकारो द्वादशमः 12 K_{ED}; । इति श्रीमालिनीविजयोत्तरे प्रथमधारणाधिकारो द्वादशमः 12 B; इति श्रीमालिनीविजयोत्तरे प्रथमधारणाधिकारो द्वादशमः 12 G; इति श्रीमालिनीविजयोत्तरे प्रथमधारणाधिकारो द्वादशमः 12 V; इति श्रीमालिनीविजयोत्तरे प्रथमधारणाधिकारो द्वादशमः 12 JP

13

अथातः सम्प्रवक्ष्यामि धारणां वारुणीमिमाम् ।
यया संसिद्धयोगेन जलान्ताधिपतिर्भवेत् ॥१॥
[वारुणीधारणा, 1. शुद्धा]
जलान्तःस्थं स्मरेद्देहं सितं शीतं सुवर्तुलम् ।
सबाह्याभ्यन्तरं योगी नान्यदस्तीति चिन्तयेत् ॥२॥
एवमभ्यस्यतस्तस्य सप्ताहात्क्लिन्नता भवेत् ।
पित्तव्याधिपरित्यक्तो मासेन भवति ध्रुवम् ॥३॥
स्निग्धाङ्गः स्निग्धदृष्टिश्च नीलकुञ्चितमूर्धजः ।
भवत्यब्देन योगीन्द्रस्त्रिभिर्वर्षति मेघवत् ॥४॥
इत्येषा वारुणी प्रोक्ता प्रथमा शुद्धधारणा ।
[2. सकलशक्तिधारणा]
अधुना संप्रवक्ष्यामि भेदैरभिन्नामिमां पुनः ॥५॥

Adhikāra 13.2a **जलान्तःस्थं** :: *cf.* SvaTa$_{KSTS}$ 12.86a: जलापूरितसर्वाङ्गो **2ab** *cit.* SvaTaUd$_{KSTS}$ 12.86–87:*a* + इति श्रीपूर्वोक्तनीत्या कमललाञ्छित-सितार्धचन्द्रमण्डलात्मिकां जलधारणां बद्ध्वा. . . ; *cf.* PaĀkhTa$_{G}$ 14.36cd–37a: आप्याया (*aiśa genitive*) धारणा धार्या सार्धचन्द्रैकमण्डला । शुक्लाब्जला-ञ्छिता सौम्या. . . , 14.38*d:* सितं (*em;* शीतं *cod)* शीतामृतजलानुगम् **2–20** Δ SvaTa$_{KSTS}$ 12.86–87; Δ MatPār$_{BH}$ YP 4.45d–51; Δ PaĀkhTa$_{G}$ 14.36cd–39 **4d** *cf.* PaĀkhTa$_{G}$ 14.39cd: सेचयेदग्निसंतप्तं क्षयार्तं परिपोषयेत्

Codd: K$_1$ K$_2$ K$_3$ K$_4$ ≃ K$_{ED}$; B V J G P = α; B V J = β; G P = γ

Adhikāra 13.1b **धारणां**] K$_{ED}\beta$P; धारणा G **2a** **जलान्तःस्थं**] K$_{ED}\beta$G; जलान्ताःस्थं P, जलात्मकं *SvaTaUd*$_{KSTS}$ **2b** **सुवर्तुलम्**] K$_{ED}$-β *SvaTaUd*$_{KSTS}$; सुवर्तलम् γ **3a** **अभ्यस्यतस्**] K$_{ED}$; अभ्यसतस् α **4b** **॰मूर्धजः**] K$_{ED}\gamma$VJ; ॰र्धजः B

Incipit 13 : G, **॥श्रीगुरुभ्यो नमः॥** J

पूर्ववच्चिन्तयेद्देहं सव्यापारं सितं स्वकम् ।
जलोपरि स्थितं देवि तद्गतेनान्तरात्मना ॥६॥
सप्ताहान्मुच्यते रोगैः सर्वैः पित्तसमुद्भवैः ।
षण्मासाज्जायते स्थैर्यं यदि तन्मयतां गतः ॥७॥
जलावरणविज्ञानममब्दैरस्य त्रिभिर्भवेत् ।

[3. सकलधारणा]

निर्व्यापारप्रभेदेऽपि सर्वत्र वरुणोपमः ॥८॥
स याति वारुणं तत्त्वं भूमिकाः क्रमशोऽभ्यसेत् ।

[4. प्रलयाकलशक्तिधारणा, 5. प्रलयाकलधारणा]

पूर्ववत्कण्ठमध्यस्थमात्मानं द्वादशाङ्गुलम् ॥९॥
संस्मरञ्जलतत्त्वेशं प्रपश्यत्यचिराद्ध्रुवम् ।
तद्दृष्टिः स्थिरतामेति स्वरूपे पञ्चमे स्थिरे ॥१०॥

[6. विज्ञानाकलशक्तिधारणा, 7. विज्ञानाकलधारणा]

द्विभेदेऽपि स्थिरीभूते चन्द्रबिम्बे घनावृते ।
तत्समानत्वमभ्येति

[8. मन्त्रशक्तिधारणा, 9. मन्त्रधारणा]

ततः सकलरूपिणी ॥११॥
चिन्त्यते देहमापूर्य सितवर्णेन तेजसा ।
तदेव स्थिरतामेति तत्र सुस्थिरतां गते ॥१२॥

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

6b सव्यापारं] K_{ED}B^{mg}γVJ; *omitted* B ♦ **स्वकम्**] K_{ED}G; स्वकूम् V, सुकं JP **7b सर्वैः**] K_{ED}BJP; सर्वइ GV **8a °विज्ञानम्**] K_{ED}-β; °विज्ञानर् γ **9a वारुणं**] $K_{ED}$$\beta$P; वरुणं G **9b भूमिकाः**] *em.*; भूमिकां $K_{ED}$$\alpha$ **11a स्थिरी°**] $K_{ED}$$\beta$G; स्थिरे P **12d सुस्थिरतां**] $K_{ED}$$\beta$; स्वस्थिरतां γ

[10.–11. मन्त्रेश्वरद्वयोर्धारणा]
घनमुक्तेन्दुबिम्बाभं ततः समनुचिन्तयेत् ।
तत्पतित्वं समभ्येति द्वितीये स्थिरतां व्रजेत् ॥१३॥
[12.–13. मन्त्रमहेश्वरद्वयोर्धारणे]
अधःप्रकाशकं शुक्लं ततस्तेजो विचिन्तयेत् ।
विद्येश्वरत्वमाप्नोति जलावरणसंभवम् ॥१४॥
[14.–15. शक्तिशिवयोर्धारणे]
स्वदेहव्यापिनि ध्याते तत्रस्थे शुक्लतेजसि ।
सर्वाधिपत्यमाप्नोति सुस्थिरे तत्र सुस्थिरम् ॥१५॥
[सर्वधारणासु सिद्धिक्रमः]
ध्येयतत्त्वसमानत्वमवस्थात्रितये स्थिरे ।
द्वितये च तदीशानसंवित्तिरुपजायते ॥१६॥
द्वितयेऽन्यत्र तत्तुल्यः स्थिरो भवति योगवित् ।
षट्के सर्वेशतामेति द्वितयेऽन्यत्र तु च्युतिः ॥१७॥
इत्ययं सर्वतत्त्वेषु भेदे पञ्चदशात्मके ।

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

13a **°बिम्बाभं**] *em.* SANDERSON; °बिम्बाभस् K_{ED}BγV; °बिम्बाभास् J 13cd–14ab *omitted* P 13d **द्वितीये**] βG; द्वितीयं K_{ED} ♦ **व्रजेत्**] $K_{ED}\beta$; त्रजेत् G 14a **अधः°**] *conj.*; अतः $K_{ED}\alpha$ 14b **तेजो**] K_{ED}-β; तेजी G 15a **°व्यापिनि**] K_{ED}BγV; °व्यापि J *hypometrical* ♦ **ध्याते**] $K_{ED}\beta$G; ध्याने P 15c **°ाधिपत्यम्**] $K_{ED}\beta$G; °ाधिपतिम् P 15d **सुस्थिरे**] $K_{ED}\beta$; स्वस्थिरे γ ♦ **सुस्थिरम्**] $K_{ED}\beta$; स्वस्थिरम् γ 16c **द्वितये**] *conj.*; द्वितीये $K_{ED}\alpha$ 17a **द्वितये**] *conj.*; द्वितीये $K_{ED}\alpha$ 17c **षट्के**] $K_{ED}\beta$P; शङ्क° G 17d **द्वितये**] *conj.*; द्वितीये $K_{ED}\beta$G, द्विती P ♦ **तु च्युतिः**] $K_{ED}\beta$; तुष्यतिः γ 18a **°तत्त्वेषु**] $K_{ED}\beta$P; °तत्त्वेशु G 18b **भेदे**] $K_{ED}\beta$P; भेद° G

14a **अधः°** :: *cf.* MVUT 12.37a.

ज्ञेयो विधिरविधानज्ञैः फलपञ्चकसिद्धिदः ॥१८॥
तत्फलान्तरमेतस्मादुक्तं यच्चापि वक्ष्यते ।
अनुषङ्गफलं ज्ञेयं तत्सर्वमविचारतः ॥१९॥
इतीयं वारुणी प्रोक्ता प्रभेदैर्दशपञ्चभिः ।
योगिनां योगसिद्ध्यर्थम्

[आग्नेयीधारणा 1. शुद्धा]

आग्नेयीमधुना शृणु ॥२०॥
त्रिकोणं चिन्तयेद्देहं रक्तज्वालावलीधरम् ।
स्वशरीरोत्थितो वह्निर्ज्वलन्वै सर्वदाहकः ॥२१॥
सप्तभिर्दिवसैरदेवि तैक्ष्ण्यमस्योपजायते ।
वातश्लेष्मभवैः सर्वैर्मासान्मुच्यति साधकः ॥२२॥
निद्राहीनश्च बह्वाशी स्वल्पविण्मूत्रकृद्भवेत् ।

21ab *cit.* with additional halfverse $\text{SvaTaUd}_{\text{KSTS}}$ *ad* 12.88ab: स्वशरीरोत्थितो वह्निरज्वलन्वै सर्वदाहकः, the same halfverse is partially cited at $\text{SvaTaUd}_{\text{KSTS}}$ 12.90cd:*a*: ज्वलन्वै सर्वदाहकः; *cf.* $\text{PaĀkhTa}_{\text{G}}$ 14.40cd–41a: आग्नेयी धारणा धार्या त्र्यश्रमण्डलमण्डिता । रक्ता शृङ्गाटकाविष्टा... **21–34ab** Δ $\text{SvaTa}_{\text{KSTS}}$ 12.88ab; Δ $\text{PaĀkhTa}_{\text{G}}$ 14.40–43ab; Δ $\text{MatPār}_{\text{BH}}$ YP 4.52–53

Codd: K_1 K_2 K_3 K_4 $\simeq K_{ED}$; B V J G P = α; B V J = β; G P = γ

18c **विधिर्**] $K_{ED}\beta$G; विधि° P **18d** **फल°**] $K_{ED}\beta$G; फलं फल° *dittography* P **19a** **एतस्माद्**] $K_{ED}\beta$P; एतस्मा G **19b** **उक्तं यच्चापि**] $K_{ED}\beta$P; उक्तयश्चापि G **20a** **इतीयं**] β; इत्येवं K_{ED}, इत्येयं γ **20b** **प्रभेदैर्**] $K_{ED}\beta$P; प्रभेदै G **20d** **आग्नेयीम्**] K_{ED}BGJ; आग्नीयीम् V, आग्नीयेम् P **21a** **चिन्तयेद्**] $K_{ED}\beta$P *SvaTaUd*$_{\text{KSTS}}$; चिन्तये G **21ab** *SvaTaUd*$_{\text{KSTS}}$; *omitted* $K_{ED}\alpha$ **22c** **°भवैः**] $K_{ED}\beta$; °भवेः G, भवै P ♦ **सर्वैर्**] $K_{ED}\beta$G; सर्पैः P **22d** **मुच्यति**] $K_{ED}\beta$G; मुच्येत P

इच्छया निर्दहेद्यद्यत्स्पृष्टं वस्तु ऋतुक्षयात् ॥२३॥
त्र्यब्दादग्निसमो भूत्वा क्रीडत्यग्निर्यथेच्छया ।
सर्वं निर्दहति क्रुद्धः सशैलवनकाननम् ॥२४॥

[2.–3. सकलद्वयोर्धारणे]

त्रिकोणमण्डलारूढमात्मानमनुचिन्तयेत् ।
सव्यापारादिभेदेन सर्वत्रापि विचक्षणः ॥२५॥
सप्ताहाद्व्याधिभिर्हीनः षण्मासादग्निवद्भवेत् ।
त्रिभिरब्दैः स संपूर्णं तेजस्तत्त्वं प्रपश्यति ॥२६॥
यच्छक्तिभेदे यद्दृष्टं तत्तद्भेदे स्थिरीभवेत् ।

[4.–5. प्रलयाकलद्वयोर्धारणे]

पूर्ववत्तालुमध्यस्थ मात्मानं ज्वलनप्रभम् ॥२७॥
ध्यायन्प्रपश्यते तेजस्तत्त्वेशानखिलान्क्रमात् ।

23–24 *cf.* PaĀkhTa$_{G}$ 14.43cd–44ab: भस्मीकरोति तुङ्गाद्रिं वनं वा काननं पुरम्। प्रासादं रिपुसैन्यं वा †क्रूरं वा कल्पपादपम्†

Codd: K_{I} K_{2} K_{3} K_{4} ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

23c **निर्दहेद्**] *conj.* Sanderson; निर्दहत्य् $K_{ED}\alpha$ ♦ **यद्यत्**] *conj.* Sanderson; अन्यत् $K_{ED}\beta$; अस्यत् γ 23d **स्पृष्टं**] *em.*; स्पृष्ट° P, स्पष्ट° $K_{ED}\beta$G 24a **त्र्यब्दाद्**] $K_{ED}B^{mg}$G; त्र्यहाद् βP 25d **विचक्षणः**] K_{ED}BγV; विचणः J 26a **व्याधिभिर्**] $K_{ED}\beta$P; ह्यादिभि G 26b **अग्निवद्भवेत्**] $K_{ED}^{pc}K_{3}\beta$P; अग्निसाङ्गवेत् K_{ED}^{ac}, अग्निबहुवेत् G 26c **अब्दैः**] $K_{ED}\beta$G; अब्दै P ♦ **संपूर्णं**] K_{ED}; संपूर्णस् α 27a **°भेदे यद्**] $K_{ED}\beta$P; °भेदये G 27b **स्थिरी°**] $K_{ED}\beta$P; स्थिरे G 27c **तालु°**] $K_{ED}\beta$G; ताल° P 28b **क्रमात्**] $K_{ED}\beta$; क्रमः γ

23d **°वस्तु ऋतु°** :: Absence of *sandhi metri causa.* 27a A correct *[ra]ma-vipulā*: - - ˘ - -, - - - .

[6.–7. विज्ञानाकलद्वयोर्धारणे]

धूमाक्रान्ताग्निसंकाशं रविबिम्बसमाकृतिम् ॥२८॥
ध्यायंस्तन्मध्यतस्तेजस्तत्त्वेशसमतां व्रजेत् ।

[8.–9. मन्त्रद्वयोर्धारणे]

प्रभाहततमोजालं विधूमाग्निसमप्रभम् ॥२९॥
तत्रैव सकलं ध्यायेत्तत्पतित्वमवाप्नुयात् ।

[10.–11. मन्त्रेश्वरद्वयोर्धारणे]

दिवसाग्निप्रभाकारं तत्र तेजो विचिन्तयेत् ॥३०॥
तन्मन्त्रेश्वरतामेति तत्र सुस्थिरताम्गतः ।

[12.–13. मन्त्रमहेश्वरद्वयोर्धारणे]

मणिप्रदीपसंकाशं तेजस्तत्र प्रकाशयेत् ॥३१॥
मन्त्रेशेशत्वमभ्येति योगी तन्मयतां गतः ।

[14.–15. शक्तिशिवयोर्धारणे]

सबाह्याभ्यन्तरं तेजो ध्यायन्सर्वत्र तद्गतः ॥३२॥
तस्मान्न च्यवते स्थानादासंहारमखण्डितः ।
संहारे तु परं शान्तं पदमभ्येति शाङ्करम् ॥३३॥

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

28c धूमा°] $K_{ED}\beta$G; धूपा° P **29a ध्यायंस्तन्°**] K_{ED}; ध्यायन्तं° βP, ध्यायतं G **29b °तत्त्वेश°**] K_{ED}G; °तत्त्वेशैः β, तत्त्वेशः P **29c °जालं**] $K_{ED}\beta$P; °ज्वालं G **30c दिवसाग्निप्रभाकारं**] K_{ED}BGV; *omitted* J, दिवसाग्निप्रभाकारां P **30d** *omitted* J **31a तन मन्त्रेश्वरताम्**] K_{ED}^{pc}; तन्मात्रसमताम् K_{ED}^{ac}G, तन्मन्त्रसमताम् K_3BV, तन्मत्रसमताम् J, तत्पात्रसमताम् P **31b गतः**] *em.* SANDERSON; गते $K_{ED}\beta$, गतेः γ **32c °भ्यन्तरं**] $K_{ED}\beta$P; °भ्यन्ततं G **32d ध्यायन्**] K_{ED}Gβ; ध्यायेत् P ♦ **तद्गतः**] *em.*; तद्गतं $K_{ED}\alpha$ **33a च्यवते**] $K_{ED}\beta$G; च्यवतो P **33c शान्तं**] $K_{ED}\beta$P; शीतं G **33d पदमभ्येति**] $K_{ED}\beta$; पदमध्ये तु γ ♦ **शाङ्करम्**] $K_{ED}\beta$; शङ्करम् γ

इत्येषा पञ्चदशधा कथिता वह्निधारणा ।

[वायुजयः, १. स्वरूपधारणा]

स्वदेहं चिन्तयेत्कृष्णं वृत्तं षड्बिन्दुलाञ्छितम् ॥३४॥
चलं सचूचूशब्दं च वायवीं धारणां श्रितः ।
चलत्वं कफजव्याधिविच्छेदाद्वायुवद्भवेत् ॥३५॥
षण्मासमभ्यसेद्योगी तद्गतेनान्तरात्मना ।
योजनानां शतं गत्वा मुहूर्तादित्यखेदतः ॥३६॥
वत्सरैस्तु त्रिभिः साक्षाद्वायुरूपधरो भवेत् ।
चूर्णयत्यद्रिसंघातं वृक्षानुन्मूलयत्यपि ॥३७॥

34cd *cf.* PaĀkhTa$_{G}$ 14.43cd–44ab विधार्या धारणा वायोः सुवृत्तध्यानमण्डला । षड्बिन्दुलाञ्छना (*em.*; तद्° *cod*) धूम्रा स्वबीजपरितोषिता; *cf.* SvaTa$_{KSTS}$ 12.88cd: कृष्णरेण्वात्मको वायुर्ध्येयो… **34cd–35a** *cit.* SvaTaUd$_{KSTS}$ 12.88cd–89a:*a* **35ab–44ab** ∆ SvaTa$_{KSTS}$ 12.88cd–89ab; ∆ PaĀkhTa$_{G}$ 14.43cd–46; ∆ MatPār$_{BH}$ YP 4.54–57 **37** *cf.* PaĀkhTa$_{G}$ 14.46: विक्षिपेद्विद्विषं सैन्यं चालयेद्भूतराक्षसान् / कूष्माण्डं सपिशाचादि पादपान्पर्वतानपि

Codd: K_{I} K_{2} K_{3} K_{4} $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

34c **स्वदेहं**] $K_{ED}\gamma$VJ *SvaTaUd*$_{KSTS}$; स्वेदेहं B **34d** **वृत्तं**] K_{ED}B^{pc} *SvaTaUd*$_{KSTS}$; वृत्त° $K_{I}\alpha$ ♦ **षड्बिन्दु°**] $K_{ED}\beta$ *SvaTaUd*$_{KSTS}$; °षट्पञ्च° $K_{I}\gamma$ ♦ **°लाञ्छितम्**] $K_{ED}\alpha$ *SvaTaUd*$_{KSTS}$; °लाञ्छनम् K_{I} **35a** **चलं**] $K_{ED}\beta$ *SvaTaUd*$_{KSTS}$; बलं γ ♦ **सचूचूशब्दं**] $K_{ED}\alpha$; सधूधूशब्दं *SvaTaUd*$_{KSTS}$ **35b** **धारणां श्रितः**] $K_{ED}\beta$G; धारणाश्रिताः P **35d** **विच्छेदाद्वायुवद्**] K_{ED}; विच्छेद⟨ाद्वायु⟩वद् B, विच्छेद⊔⊔वद् γ, विच्छेदवद् V, विच्छेद⟨बल⟩वद्भवेत् J **36a** **अभ्यसेद्**] $K_{ED}\beta$G; अभ्यसद् P, अभ्यसन् K_{3} **36d** **एत्यखेदतः**] K_{ED}; एव खेदतः $K_{I}\alpha$ **37a** **साक्षाद्**] $K_{ED}\beta$P; साक्षा G **37c** **चूर्णयत्यद्रि°**] $K_{ED}\alpha$; चूर्णयन्पत्र° K_{I}

34a A correct *[gaga]-na-vipulā:* - - - - ˘ ˘ ˘ -. **35a** A correct *[ra]ma-vipulā:* ˘ - ˘ - -, - - ˘.

क्रुद्धश्चालयते शक्रं सभृत्यबलवाहनम् ।

[2. सकलशक्ति-, 3. सकलधारणा]

नीलाञ्जननिभं देहमात्मीयमनुचिन्तयेत् ॥३८॥
पूर्वोक्तं सर्वमाप्नोति षण्मासान्नात्र संशयः ।
त्र्यब्दात्प्रपश्यते वायुतत्त्वं तन्मयतां गतः ॥३९॥

[4. प्रलयाकलशक्ति-, 5. प्रलयाकलधारणा]

भ्रुवोर्मध्ये स्मरेद्रूपमात्मनोऽञ्जनसंनिभम् ।
पश्यते वायुतत्त्वेशानाशुगानखिलानपि ॥४०॥

[6. विज्ञानाकलशक्ति-, 7. विज्ञानाकलधारणा]

घनावृतेन्द्रनीलाभरविबिम्बसमाकृतिम् ।
ध्यायंस्तत्समतामेति तत्संलीनो यदा भवेत् ॥४१॥

[8. मन्त्रशक्ति-, 9. मन्त्रधारणा]

भिन्नेन्द्रनीलसंकाशं सकलं तत्र चिन्तयेत् ।

[10.–11. मन्त्रेश्वरद्वयं, 12.--१३॥ मन्त्रमहेश्वरद्वयम्]

तन्मन्त्रेशत्वमाप्नोति ततस्तस्येशतामपि ॥४२॥

Codd: K_1 K_2 K_3 $K_4 \simeq K_{ED}$; B V J G P = α; B V J = β; G P = γ

38a **चालयते शक्रं**] βP; चानयते शक्रं K_{ED}, च जयति शत्रुम् K_1, चार्जयते शक्रं G 39a **आप्नोति**] K_{ED}BV; अप्नोषि γJ 39b **षण्मासान्**] $K_{ED}\beta$; षण्मासा γ 39c **वायु॰**] $K_{ED}\beta$G; वायुस् P 39d **तत्त्वं**] $K_{ED}\beta$P; सत्त्वं G 40b **ऽञ्जन॰**] $K_{ED}\beta$; जन॰ γ 40d **आशुगान्**] K_{ED}^{pc}; अशुद्धान् $K_{ED}^{ac}\alpha$ 41a **॰वृतेन्द्र॰**] K_{ED}BGV; ॰दृतेन्द्र॰ JP ♦ **॰भ॰**] *em.*; ॰भो K_{ED}BγJ, ॰भं V 41c **ध्यायंस्**] $K_{ED}\beta$; ध्यायन् γ 41d **॰संलीनो**] $K_{ED}\beta$P; ॰सलीनो G 42a **भिन्नेन्द्र॰**] $K_{ED}\beta$P; भिन्नन्द्र॰ G

[14. शक्ति-, 15. शिवधारणा]

सर्वव्यापिनि तद्वर्णे ध्याते तेजस्यवाप्नुयात् ।
तदाप्रधृष्यतामेति तत्राधोर्ध्वविसर्पिणि ॥४३॥
इतीयं कथिता दिव्या धारणा वायुसम्भवा ।

[व्योमजयः, 1. स्वरूपधारणा]

स्वदेहं वायुवद्ध्यात्वा तदभावमनुस्मरन् ॥४४॥
दिवसैः सप्तभिर्योगी शून्यतां प्रतिपद्यते ।
मासमात्रेण भोगीन्द्रैरपि दष्टो न मुह्यति ॥४५॥
सर्वव्याधिपरित्यक्तो वलीपलितवर्जितः ।
षण्मासाद्गगनाकारः सूक्ष्मरन्ध्रैरपि व्रजेत् ॥४६॥
वत्सरत्रितयात्साक्षाद्व्योमवच्च भविष्यति ।
इच्छयैव महाकायः सूक्ष्मदेहस्तथेच्छया ॥४७॥
अच्छेद्यश्चाप्यभेद्यश्च च्छिद्रां पश्यति मेदिनीम् ।

45ab–54ab ∆ SvaTa$_{KSTS}$ 12.89cd–90ab; ∆ PaĀkhTa$_{G}$ 14.47–48ab; ∆ MatPār$_{BH}$ YP 4.58–72   **44cd** *cf.* PaĀkhTa$_{G}$ 14.47ab: आकाशधारणा धार्या शून्या सा शून्यलाञ्छना   **46cd–48a** *cit.* SvaTaUd$_{KSTS}$ 12.90b:*a*

Codd: K$_1$ K$_2$ K$_3$ K$_4$ ≃ K$_{ED}$; B V J G P = α; B V J = β; G P = γ

43b ध्याते] K$_{ED}\beta$P; ध्यायेत् G   **43c °प्रधृष्यताम्**] K$_{ED}\beta$P; °प्रध्यष्यतां G   **43d तत्राधोर्ध्व°**] α; तत्रोर्ध्वाधो° K$_{ED}$ **44a इतीयं**] β; इत्येवं K$_{ED}$, इत्येयं γ **45a दिवसैः**] K$_{ED}\beta$P; दिवसे G   **45c भोगीन्द्रैर्**] K$_{ED}\beta$G; भोगेन्द्रैर् P   **45d दष्टो**] K$_{ED}$VJ; दृष्टो Bγ **46c षण्मासाद्**] K$_{ED}\beta$P *SvaTaUd*$_{KSTS}$; षण्मासा G   **47a °त्रितयात्**] K$_{ED}$BGV *SvaTaUd*$_{KSTS}$; °त्रितया JP   ♦ **साक्षाद्**] α; सार्धाद् K$_{ED}$*SvaTaUd*$_{KSTS}$ **47b व्योमवच्च**] K$_{ED}$Bγ; व्योमव V, व्योम⟨ात्मै⟩व J, व्योम एव *SvaTaUd*$_{KSTS}$ **47c इच्छयैव**] K$_{ED}\beta$P *SvaTaUd*$_{KSTS}$; यच्छयैव G   **48b च्छिद्रां**] K$_{ED}$VJ; छिन्नं G, छिद्रं P

43d तत्राधोर्ध्व° :: *aiśa-sandhi*.   **47a साक्षाद्** :: *cf.* MVUT 13.36cd

[2.–3. सकलद्वयोर्धारणे]

†शतपुष्परसोच्छिष्टमूषागर्भखवन† निजम् ॥४८॥
देहं चिन्तयतस्त्र्यब्दाद्व्योमज्ञानं प्रजायते ।
पूर्वोक्तं च फलं सर्वं सप्ताहादिकमाप्नुयात् ॥४९॥

[4.–5. प्रलयाकलद्वयोर्धारणे]

ललाटे चिन्तयेत्तद्वद्द्वादशाङ्गुलमायतम् ।
तत्तत्त्वेशान्क्रमात्सर्वान्प्रपश्यत्यग्रतः स्थितान् ॥५०॥

[6.–7. विज्ञानाकलद्वयोर्धारणे]

राहुग्रस्तेन्दुबिम्बाभं ध्यायंस्तत्समतां व्रजेत् ।

[8.–9. मन्त्रद्वयोर्धारणे]

सकलं चन्द्रबिम्बाभं तत्रस्थमनुचिन्तयेत् ॥५१॥

[10.–11. मन्त्रेश्वरद्वयम्]

तन्मन्त्रेशत्वमाप्नोति ज्योत्स्नया चेन्द्रतामपि ।

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

48ab **॰ेचच्छिष्टमूषा॰**] K_{ED} B*mg*; ॰ेचच्छिष्टपूषा॰ BJ, , ॰ेचच्छिष्टप्रथा॰ G, ॰ेचच्छिष्टपुषा॰ V, ॰ेच्छिष्टपूर्षा॰ P **50a** **चिन्तयेत्**] K_{ED}; चिन्तयंस् BV, चिन्तयेत् > चिन्तयत् G, चिन्तयस् J, चिन्तयन् P ◆ **तद्वद्**] $K_{ED}\beta$P; तद्व G **50b** **आयतम्**] $K_{ED}\beta$P; आयुतम् G **50c** **तत्तत्त्वेशान्**] $K_{ED}\beta$G; तत्तत्त्वेशात् P ◆ **सर्वान्**] $K_{ED}\beta$; सर्वांत G, सर्वात P **51a** **॰ग्रस्तेन्दु॰**] $K_{ED}\beta$P; ॰ग्रस्तन्दु॰ G **51b** **ध्यायंस्**] $K_{ED}\beta$; ध्यायन् γ **51c** **चन्द्र॰**] K_{ED} B*pc* γVJ; चेन्द्र॰ B*ac* **52a** **॰मन्त्रेशत्वम्**] $K_{ED}\beta$P; ॰मन्त्रेशतम् G **52b** **चेन्द्रताम्**] *conj.* (*cf.* 13.17c); चन्द्रताम् $K_{ED}\alpha$

[12.–13. मन्त्रमहेश्वरद्वयोर्धारणे]

तयैवाधोविसर्पिण्या सबाह्याभ्यन्तरं बुधः ॥५२॥
मन्त्रेश्वरेशतामाप्य विज्ञानमतुलं लभेत् ।

[14. शक्ति-, 15. शिवधारणा]

तया चोर्ध्वविसर्पिण्या ज्योत्स्नयामृतरूपया ॥५३॥
स्वतन्त्रत्वमनुप्राप्य न क्व चित्प्रतिहन्यते ।
इत्येवं पञ्चतत्त्वानां धारणाः परिकीर्तिताः ॥५४॥

[भूतावेशः]

शुद्धाद्यस्था तु संवित्तिर्भूतावेशोऽत्र पञ्चधा ।
तास्वेव संदधच्चित्तं विषादिक्षय आत्मनः ॥५५॥
अन्यस्यामपि संवित्तौ यस्यामेव निजेच्छया ।
चेतः सम्यक्स्थिरीकुर्यात्तया तत्फलमश्नुते ॥५६॥
एकापि भाव्यमानेयमवान्तरविभेदतः ।

55ab–62ab *cf.* MVUT 2.17–19; *cf.* SvaTa$_{\text{KSTS}}$ 10.353cd–354ab

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

52d बुधः] K_{ED}Gβ; बुधाः P **53a °एशतामाप्य**] K_{ED}V; °एशतामस्य BJP, °एशतासम्य G **53c °विसर्पिण्या**] $K_{ED}\gamma$V; °विसर्पिण्यो J **53d ज्योत्स्नया°**] K_{ED}BγJ; ज्योत्नया° V **54a स्वतन्त्रत्वम्**] $K_{ED}\beta$; स्वमन्त्रत्वम् G, स्वतन्त्रतुम् P **54b क्व**] $K_{ED}\beta$P; क्वा G **54d धारणाः**] β; धारणा $K_{ED}\gamma$ ♦ **परिकीर्तिताः**] βP; परिकीर्तिता K_{ED}-G **55a शुद्धाद्यस्था**] *em.* Sanderson; शुद्धाद्यस्तास् Gβ, शुद्धाध्वस्था K_{ED}B^{mg}, शुद्धाद्यास्तास् P ♦ **संवित्तिर्**] K^{pc}_{ED}BJ; संवित्ति°] $K^{ac}_{ED}\gamma$V **55b पञ्चधा**] K_{ED}VJ; पञ्च वा Bγ **55c तास्वेव**] K_{ED}BγV; तासु अव° J **55d °क्षय**] *em.* Sanderson; °क्षयम् $K_{ED}\alpha$ ♦ **आत्मनः**] $K_{ED}\beta$; आत्मना γ **56a अन्यस्याम्**] $K_{ED}\beta$P; अनम्याम् G **56c °कुर्यात्**] $K_{ED}\beta$; °कुर्या γ **56d तत्फलम्**] K_{ED}Gβ; त्फलम् P **57a एकापि भाव्यमानेयम्**] K_{ED}BJP; एकाप्यभाव्यमानेयम् G, एकापि भाविमान्येयम् V **57b अवान्तरविभेदतः**] $K_{ED}\beta$P; अवान्तरमभेदतः G

अन्तरायत्वमभ्येति तत्र कुर्यान्न संस्थितिम् ॥५७॥
संस्थितिं तत्र कुर्वन्तो न प्राप्स्यन्त्युत्तमं फलम् ।
धारणापञ्चके सिद्धे पिशाचाद्या गुणाष्टकाः ॥५८॥
ऐन्द्रान्ताः पञ्च सिद्ध्यन्ति योगिनां भेदतोऽपि वा ।
इष्टाः पञ्चदशावस्थाः क्रमेणैव समभ्यसन् ॥५९॥
त्र्यब्दादाद्यां प्रसाध्यान्यां द्वाभ्यामेकेन चापराम् ।
षण्मासात्पञ्चभिश्चान्यां चतुर्भिस्त्रिभिरेव च ॥६०॥
द्वाभ्यामेकेन पक्षेण दशभिः पञ्चभिर्दिनैः ।
त्रिभिर्द्वाभ्यामथैकेन व्यस्तेच्छोः पूर्ववत्क्रमः ॥६१॥

58cd–59ab *cf.* ŚaiPa 4 § 65–66, citations of the PauĀg, and the ŚiDha-Utt: तत्राष्टगुणमैश्वर्यं पार्थिवं पिशिताशिनाम् / तत्सायुज्यगतानां च नराणां तत्समं स्मृतम् । रक्षसां षोडशगुणं पार्थिवाप्यं च तद्द्विधा / एतन्निरवशेषेण यक्षेष्वन्यच्च तैजसम् । गन्धर्वाणां च वायव्यं याक्षं च सकलं स्मृतम् / पाञ्चभौतिकमिन्द्रस्य चत्वारिंशद्गुणं महत्; *cf.* MVUT 16.67; on the गुणाष्टक° *cf.* SvaTa$_{KSTS}$ 10.1073; *cf.* KirTa$_{G}$ 58.52–60; *cf.* PaĀkhTa$_{G}$ 14.93–96, BhaiMaṅ$_{NAK}$ 1.16cd–19ab, ŚaiPa 4 § 64, ŚaiPaMañ 8.86cd–93ab, YoSūBhā 3.44, YāSmṛ$_{S}$ 3.4.202–203

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

57d कुर्यान्न] $K_{ED}\beta$; कुर्यात्स G, कुर्यात्न P **58a संस्थितिं**] $K_{ED}\beta$P; संस्थिति G **तत्र कुर्वन्तो**] K_{ED}VJγ; कुर्वतस्तत्र B **58d पिशाचाद्या**] *em.*; पिशाचानां K_{ED}, पिशाच⟨ानां⟩ B, पिशाच⊔ γJ, पिशाद V ♦ **गुणाष्टकाः**] *conj.*; गुणाष्टकम् $K_{ED}\beta$P, गुणात्मकम् G **59a ऐन्द्रान्ताः**] K_{ED}; ऐन्द्रान्तः BGJ, ऐन्द्रान्ता V, एन्द्रान्ता P ♦ **सिद्ध्यन्ति**] $K_{ED}\beta$G; सिद्ध्यति P **59b योगिनां**] $K_{ED}\beta$P; योगिना G ♦ **भेदतो**] K_{ED}VJ; भेदनो γ ♦ **वा**] $K_{ED}\beta$G; *omitted* P **59c इष्टाः**] $K_{ED}\beta$; इष्टा γ ♦ **°वस्थाः**] $K_{ED}\beta$G; °ावस्था P **59d समभ्यसन्**] $K_{ED}\beta$P; समभ्यसेत् G **60a त्र्यब्दाद्**] $K_{ED}\gamma$VJ; अब्दाद् B ♦ **प्रसाध्यान्यां**] K_{ED}; प्रसाद्यान्यां BJP, प्रसादान्यां GV **60c पञ्चभिश्**] $K_{ED}\beta$P; यम्बभिश् G **61a एकेन**] $K_{ED}\beta$G; एकोण P

शाश्वतं पदमाप्नोति भुक्त्वा सिद्धिं यथेप्सिताम् ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे
भूतजयाधिकारस्त्रयोदशः
समाप्तः

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

62b भुक्त्वा] $K_{ED}\beta$; भुक्ता γ ♦ **सिद्धिं**] $K_{ED}\beta$G; सिद्धं P

Explicit 13 इति श्रीमालिनीविजयोत्तरे तन्त्रे भूतजयाधिकारस्त्रयोदशः / 13/ K_{ED}; इति श्रीमालिनीविजयोत्तरे जयाधिकारस्त्रयोदशः / 13/ G; इति श्रीमालिनीविजयोत्तरे जयाधिकारस्त्रयोदशः / / V; इति श्रीमालिनीविजयोत्तरे जयाधिकारस्त्रयोदशमः सर्गः 13 J; no colophon in P

14

अथ गन्धादिपूर्वाणां तन्मात्राणामनुक्रमात् ।
धारणाः संप्रवक्ष्यामि तत्फलानां प्रसिद्धये ॥१॥

[गन्धतन्मात्रधारणा, 1. शुद्धा]

पीतकं गन्धतन्मात्रं तुर्याश्रं पर्वसंमितम् ।
नासारन्ध्राग्रगं ध्यायेद् वज्रलाञ्छनलाञ्छितम् ॥२॥
दशमाददिवसादूर्ध्वं योगिनोऽनन्यचेतसः ।
क्वापि गन्धः समायाति द्विधाभूतोऽप्यनेकधा ॥३॥
ततोऽस्य ऋतुमात्रेण शुद्धो गन्धः स्थिरीभवेत् ।
षड्भिर्मासैः स्वयं गन्धमय एव भविष्यति ॥४॥
यो यत्र रोचते गन्धस्तं तत्र कुरुते भृशम् ।
त्र्यब्दात्सिद्धिमवाप्नोति प्रेप्सितां पाञ्चभौतिकीम् ॥५॥

Adhikāra 14.1–44ab *cf.* MatPār$_{BH}$ YP 4.73–84ab 2 *cit.* SvaTaUd$_{KSTS}$ 12.95cd–98ab:*a* 2–10 ∆ SvaTa$_{KSTS}$ 12.96c: पीतकं गन्धतन्मात्रं, SvaTaUd$_{KSTS}$ *ad loc:* तन्मात्राणां घ्राणाग्रादीनि स्थानानि चतुरस्रादिरूपं च श्रीपूर्वतो ज्ञातव्यं

Codd: K$_1$ K$_2$ K$_3$ K$_4$ ≃ K$_{ED}$; B V J G P = α; B V J = β; G P = γ

Adhikāra 14.1c **धारणाः**] K$_{ED}\beta$; धारणा γ 2b **पर्व°**] K$_{ED}\alpha$; पञ्च° *SvaTaUd*$_{KSTS}$ ♦ **संमितम्**] K$_{ED}\beta$P *SvaTaUd*$_{KSTS}$; संश्रितम् G 2c **°रन्ध्राग्र°**] K$_{ED}\beta$P *SvaTaUd*$_{KSTS}$; °रन्ध्रार्ध° G, °रन्ध्रान्तकं K$_1$ 3a **दशमाद्**] K$_{ED}$Bγ; दशाद् V, दशमा J ♦ **दिवसाद्**] K$_{ED}\beta$; दिवसोद् G, दिवसौद् P 3c **क्वापि**] K$_2\beta$P; कोऽपि K$_{ED}$, कापि G 3d **°भूतोऽप्यनेकधा**] K$_{ED}\alpha$; °भूतस्य नैकधा K$_2$ 4b **शुद्धो**] K$_{ED}\beta$P; शुद्ध° G 4d **°मय एव**] K_{ED}^{pc}; °मयमेव $K_{ED}^{ac}\alpha$ 5d **प्रेप्सितां**] *conj.* Sanderson; प्रेरितां K$_{ED}\alpha$

Incipit 14 ॥ श्रीगुरुभ्यो नमः ॥. . . J; all witnesses except P indicate the beginning of a new chapter. 4a **ऽस्य ऋतु°** :: Absence of *sandhi metri causa*.

[2.–3. सकलद्वयोर्धारणे]
तदूर्ध्वमात्मनो रूपं तत्र संचिन्तयेद्यदि ।
गन्धावरणविज्ञानं त्रिभिरब्दैरवाप्नुयात् ॥६॥
[4.–5. प्रलयाकलद्वयोर्धारणे]
ईषद्दीप्तियुतं तत्र तन्मण्डलविवर्जितम् ।
ध्यायन्प्रपश्यते सर्वान्गन्धावरणवासिनः ॥७॥
[6.–7. विज्ञानाकलद्वयोर्धारणे]
धरातत्त्वोक्तबिम्बाभं तत्रैवमनुचिन्तयन् ।
तत्समानत्वमभ्येति पूर्ववदद्वितये स्थिरे ॥८॥
[8.–13. मन्त्रशक्त्यादिमन्त्रमहेश्वरान्तानां धारणाः]
स्वरूपं तत्र संचिन्त्य भासयन्तमधःस्थितम् ।
तदीशत्वमवाप्नोति पूर्वोक्तेनैव वर्त्मना ॥९॥
[14.–15. शक्तिशिवयोर्धारणे]
धरातत्त्वोक्तवत्सर्वमत ऊर्ध्वमनुस्मरन् ।
तद्रूपं फलमाप्नोति गन्धावरणसंस्थितम् ॥१०॥

Codd: K_I K_2 K_3 K_4 $\simeq$ K_{ED}; B V[–9ab] J G P = α; B V[–9ab] J = β; G P = γ

6b यदि] BJP; धृदि K_{ED}GV **6d अब्दैर्**] $K_{ED}$$B^{mg}$V; देवैर् B$\gamma$J **7b मण्डल°**] $K_{ED}$$\gamma$VJ; मण्डुल° B **7c ध्यायन्**] $K_{ED}$$\beta$P; ध्यायत् G **8a °बिम्बाभं**] $K_{ED}$$\beta$P; °बिम्बान्तं K_I, °बिम्बातं G **8b तत्रैवम्**] α; तत्रैव K_{ED} ♦ **अनुचिन्तयन्**] $K_{ED}$$\gamma$J; अनुचिन्तयेत>अनुचिन्तयन् BV **8c अभ्येति**] $K_{ED}$$\beta$G; अध्येति P **10b अत**] $K_{ED}$$\beta$P; अतद्° G

6b यदि :: A sudden change in the *dhāraṇā*'s location to the heart (K_{ED}-GV धृदि) is unwarranted. **8b तत्रैवम्** :: Adopted against K_{ED} since the एवम् refers back to ईषद्दीप्तियुतं in 7a. **9b** The testimony of V is interrupted from 9cd–40a.

[रसतन्मात्रधारणा]

रसरूपामतो वक्ष्ये धारणां योगिसेविताम् ।
यया सर्वरसावाप्तिर्योगिनः संप्रजायते ॥११॥

[1. स्वरूपधारणा]

जलबुद्बुदसंकाशं राजनाड्यग्रसंस्थितं ।
चिन्तयेद्रसतन्मात्रं जिह्वाग्राधारमात्मनः ॥१२॥
सुशीतं षड्रसं स्निग्धं तद्गतेनान्तरात्मना ।
ततोऽस्य मासमात्रेण रसास्वादः प्रवर्तते ॥१३॥
लवणादीन्परित्यज्य यदा मधुरतां गतः ।
तदा तन्निगिरन्योगी षण्मासान्मृत्युजिद्भवेत् ॥१४॥
जराव्याधिविनिर्मुक्तः कृष्णकेशोऽच्युतद्युतिः ।
जीवेदाचन्द्रतारार्क मभ्यस्यंश्च क्व चित्क्व चित् ॥१५॥

11–18 ∆ SvaTa$_{KSTS}$ 12.96d: रसतन्मात्रकं सितम्   **12–13ab** *cit.* SvaTa-Ud$_{KSTS}$ 12.95cd–98ab:*b*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B J G P = α; B J = β; G P = γ

11a **वक्ष्ये**] $K_{ED}\beta$G; वक्ष्यो P   **11b** **योगि॰**] K_{ED}Vγ; योग॰ J   **12a** **॰बुद्बुद॰**] K_{ED}*SvaTaUd*$_{KSTS}$; ॰बुद्बुध॰ α **12b** **राजनाड्यग्रसं॰**] K_3B; जिह्वायां चाग्रतः K_{ED}*SvaTaUd*$_{KSTS}$; राजनीत्यग्रसं॰ γ, राजना अग्रसं॰ J **13a** **सुशीतं**] $K_{ED}\beta$P *SvaTaUd*$_{KSTS}$; स्वशीतं G   ♦ **षड्रसं**] $K_{ED}\beta$G-*SvaTaUd*$_{KSTS}$; षडसं P   ♦ **स्निग्धं**] $K_1\alpha$ *SvaTaUd*$_{KSTS}$; चिन्त्यम् K_{ED} **15a** **जरा॰**] $K_{ED}\beta$P; गज॰>राज॰ G   ♦ **॰विनिर्मुक्तः**] K_{ED}B[mg]; ॰विनिर्मुक्तो>विनिर्मुक्तः β, ॰विनिर्मुक्ते G, ॰विनिर्मुक्तो P   **15b** **कृष्ण॰**] K_{ED}; ⟨कृष्ण⟩॰ B, ⊔⊔॰ γ, ⟨कृष्ण॰⟩ J   **15c** **जीवेदा॰**] $K_{ED}\beta$; जीवेवा॰ γ **15d** **अभ्यस्यंश्**] K_{ED}; अभ्यसेच् B, अभ्यसश् γ, अभ्यसंश् J

[2.–3. सकलद्वयोर्धारणे]

पूर्वोक्तबुद्बुदाकारं स्वरूपमनुचिन्तयन् ।
नीरावरणविज्ञानमाप्नोतीति किमद्भुतम् ॥१६॥

[4.–5. प्रलयाकलद्वयोर्धारणे]

तमेव द्युतिसंयुक्तं ध्यायन्नाधारवर्जितम् ।
पश्यते वत्सरैः सर्वं रसावरणमाश्रितम् ॥१७॥

[6.–15. विज्ञानाकलशक्त्यादिशिवान्तधारणाः]

जलतत्त्वोक्तबिम्बादि तदूर्ध्वमनुचिन्तयन् ।
पूर्वोक्तं सर्वमाप्नोति रसावरणजं स्फुटम् ॥१८॥

[रूपतन्मात्राधारणा]

अतो रूपवतीं वक्ष्ये दिव्यदृष्टिप्रदां शुभाम् ।
धारणां सर्वसिद्ध्यर्थं रूपतन्मात्रमाश्रिताम् ॥१९॥

[1. स्वरूपधारणा]

एकान्तस्थो यदा योगी बहिर्मीलितलोचनः ।

19–27 ∆ $SvaTa_{KSTS}$ 12.97a: रक्तं तु रूपतन्मात्रं **20–23ab** *cit.* $SvaTaUd_{KSTS}$ 12.95cd–98ab:*c*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B J G P = α; B J = β; G P = γ

16a °बुद्बुदाकारं] K_{ED}; °बहुधाकारं K_3B, °बुद्बुधाकारं γJ **16b अनुचिन्तयन्**] $K_{ED}B^{pc}\gamma$J; अनुचिन्तयेत् B^{ac} **16c नीरावरण°**] K^{pc}_{ED}; *****B, निरावरण° $K^{ac}_{ED}\gamma$J **17a तम्**] $K_{ED}\beta$P; तद् G ♦ **°संयुक्तं**] $K_{ED}\beta$; °संयुक्त γ **17c पश्यते**] $K^{pc}_{ED}K_3\beta$P; पद्यते K^{ac}_{ED}G ♦ **सर्वं**] K^{pc}_{ED}; सर्वां $K^{ac}_{ED}\beta$P, सर्वा G **17d रसावरणम्**] K_{ED}JP; रसार्धं रणम् G ♦ **आश्रितम्**] K^{pc}_{ED}; आश्रिताम् $K^{ac}_{ED}\alpha$ **18b अनुचिन्तयन्**] $K_{ED}\beta$P; अनुचिन्तयेत् G **18d रसावरणजं**] $K_{ED}B\gamma$; रसावरणतं J **19a अतो रूपवतीं**] $K_{ED}\beta$G; अतोत्थापवतीं P **19d आश्रिताम्**] $K_{ED}\beta$G; आस्थितां P **20a एकान्तस्थो**] K_{ED}JP $SvaTaUd_{KSTS}$; एकान्तस्थे G **20b बहिर्मीलित°**] $K_1\alpha$; विनिमीलित° $K_{ED}SvaTaUd_{KSTS}$

शरत्संध्याभ्रसंकाशं यत्तत्किं चित्प्रपश्यति ॥२०॥
तत्र चेतः समाधाय यावदास्ते दशाह्निकम् ।
तावत्स पश्यते तत्र बिन्दून्सूक्ष्मतमानपि ॥२१॥
के चित्तत्र सिता रक्ताः पीता नीलास्तथापरे ।
तान्दृष्ट्वा तेषु संदध्यान्मनोऽत्यन्तमनन्यधीः ॥२२॥

[2.–3. सकलद्वयोर्धारणे]

षण्मासात्पश्यते तेषु रूपाणि सुबहूनि च ।

[4.–5. प्रलयाकलद्वयोर्धारणे]

त्र्यब्दात्तान्येव तेजोभिः प्रदीप्तानि स्थिराणि च ॥२३॥

[6.–7. विज्ञानाकलद्वयोर्धारणे]

तान्यभ्यस्यंस्ततो द्व्यब्दाद्बिम्बाकाराणि पश्यति ।

[8.–9. मन्त्रद्वयोर्धारणे]

ततोऽब्दात्पश्यते तेजः

Codd: K_I K_2 K_3 K_4 $\simeq K_{ED}$; B J G P = α; B J = β; G P = γ

20c °संध्याभ्र°] $K_{ED}\beta$P *SvaTaUd*$_{KSTS}$; °संध्याम्र° G **20d तत्**] $K_I\beta$P *SvaTaUd*$_{KSTS}$; तु K_{ED}G **21a समाधाय**] $K_{ED}\beta$ *SvaTaUd*$_{KSTS}$; समादाय G, सदामाय P **21b दशाह्निकम्**] K_IBγ; दशाहकम् K_{ED}*SvaTaUd*$_{KSTS}$, दशाहिकम् J **21c स पश्यते**] α; प्रपश्यते K_{ED}*SvaTaUd*$_{KSTS}$ **21d बिन्दून्**] $K_{ED}\beta$G *SvaTaUd*$_{KSTS}$; बिन्सू P ♦ **सूक्ष्मतमानपि**] K_{ED} *SvaTaUd*$_{KSTS}$; सूक्ष्मतमानिति $K_I\beta$, सूक्ष्मतमानिनि G, सूक्ष्मतमात्मनि P **22b पीता नीलास्**] $K_{ED}\alpha$; नीलाः पीतास् *SvaTaUd*$_{KSTS}$ **22c तान्**] K_{ED}G *SvaTaUd*$_{KSTS}$; तं βP ♦ **तेषु**] $K_I\alpha$; तत्र K_{ED}*SvaTaUd*$_{KSTS}$ ♦ **संदध्यान्**] K_{ED}B; संदद्यान γJ, संदध्याच् *SvaTaUd*$_{KSTS}$ **22d मनो**] $K_{ED}\alpha$; चेतो *SvaTaUd*$_{KSTS}$ ♦ **ऽत्यन्तम्**] K_{ED}GJ *SvaTaUd*$_{KSTS}$; न्यन्तम् P **23b सुबहूनि च**] α; सुबहून्यपि $K_{ED}B^{mg}$ *SvaTaUd*$_{KSTS}$ **24a अभ्यस्यंस्**] K_{ED}BG; अभ्यसंस् JP

21d अपि :: The adversative sense of अपि, though unsupported by the MSS, is preferable to इति.

[10.–11. मन्त्रेश्वरद्वयोर्धारणे]

षण्मासात्पुरुषाकृति ॥२४॥

[12.–13. मन्त्रमहेश्वरद्वयोर्धारणे]

त्रिमासाद्व्यापकं तेजो

[14.–15. मन्त्रमहेश्वरद्वयोर्धारणे]

मासात्सर्वं विसर्पितम् ।
कालक्रमाच्च पूर्वोक्तं रूपावरणमाश्रितम् ॥२५॥
सर्वं फलमवाप्नोति दिव्यदृष्टिश्च जायते ।
इतीयं कल्पनाशून्या धारणाकृतकोदिता ॥२६॥
दशपञ्चविधो भेदः स्वयमेवात्र जायते ।
अतोऽस्यां निश्चयं कुर्यात्किमन्यैः शास्त्रडम्बरैः ॥२७॥

[स्पर्शतन्मात्रधारणा 1. शुद्धा]

अतः स्पर्शवतीमन्यां कथयामि तवाधुना ।
धारणां तु यया योगी वज्रदेहः प्रजायते ॥२८॥

28–33ab Δ $\text{SvaTa}_{\text{KSTS}}$ 12.97b

Codd: K_1 K_2 K_3 $K_4 \simeq K_{ED}$; B J G P = α; B J = β; G P = γ

24d षण्मासात्] $K_{ED}\beta$P; षण्मासा G ♦ **पुरुषाकृति**] K_{ED}B; पुरुषाकृतिः γJ **25a व्यापकं**] $K_{ED}\beta$G; व्यापक° P **25b सर्वं**] $K_{ED}\beta$P; सर्पं G **26a सर्वं**] BP; तत्सर्वं K_{ED}G, सर्व° J ♦ **अवाप्नोति**] β-P; आप्नोति K_{ED}G **26d धारणाकृतकोदिता**] α; धारणा कृतकोदिता K_{ED} **27c अतो**] β; यतो $K_{ED}\gamma$ ♦ **निश्चयं**] K_{ED}B; निश्चयां γJ ♦ **कुर्यात्**] $K_{ED}\beta$; कुर्यां G, कुर्या P **27d अन्यैः**] $K_{ED}\beta$; अन्ये>अन्यै G, अन्यै P **28b तवाधुना**] $K_{ED}\beta$G; तवाध्वना P **28c धारणां**] $K_{ED}\beta$; धारणं γ ♦ **यया**] K_{ED}B[mg]; यदा α **28d वज्र°**] $K_{ED}\gamma$J; **B ♦ **°देहः**] $K_{ED}\beta$; °देवः G, °देर्यः P

षड्कोणमण्डलान्तःस्थमात्मानं परिभावयेत् ।
रूक्षमञ्जनसंकाशं प्रत्यङ्गस्फुरिताकुलम् ॥२९॥
ततोऽस्य दशभिर्देवि दिवसैस्त्वचि सर्वतः ।
भवेत्पिपीलिकास्पर्शस्ततस्तमनुचिन्तयन् ॥३०॥
वज्रदेहत्वमासाद्य पूर्वोक्तं पूर्ववल्लभेत् ।

[2.–5. सकलशक्त्यादिप्रलयाकलान्तधारणाः]

पूर्वोक्तमण्डलाकारं पूर्वरूपं विचिन्तयन् ॥३१॥
स्पर्शतत्त्वावृतिज्ञानं लभन्केन निवार्यते ।

[6.–15. विज्ञानाकलशक्त्यादिशिवान्तधारणाः]

हीनमण्डलमात्मानं ध्यायेत्तत्पतिसिद्धये ॥३२॥
यया संसिद्धया सर्वस्पर्शवेदी भविष्यति ।

29–31ab *cit.* SvaTaUd$_{KSTS}$ 12.95cd–98ab:*d*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B J G P = α; B J = β; G P = γ

29a **॰कोण॰**] K_{ED}B$^{pc}\gamma$J; ॰कोणं B^{ac} ♦ **॰न्तः॰**] K_{ED}GJ *SvaTaUd*$_{KSTS}$; ॰न्त॰ BP **29d** **प्रत्यङ्ग॰**] $K_1\alpha$; प्रत्यंशं K_{ED}*SvaTaUd*$_{KSTS}$ ♦ **स्फुरिताकुलम्**] K_{ED}G *SvaTaUd*$_{KSTS}$; छुरिताकुलम् $K_1\beta$, ꣼करिता꣼कुलम् P **30a** **ऽस्य**] K_{ED}*SvaTaUd*$_{KSTS}$; ऽसौ B^{pc}, सा B$^{ac}\gamma$J **30b** **त्वचि**] K_{ED}B^{mg}J *SvaTaUd*$_{KSTS}$; त्वति꣼ B, तुति G, त्वति P **30c** **॰स्पर्शस्**] $K_{ED}\beta$G *SvaTaUd*$_{KSTS}$; ॰स्पर्शं P **30d** **तम्**] $K_{ED}\alpha$; तद् *SvaTaUd*$_{KSTS}$ ♦ **अनुचिन्तयन्**] $K_{ED}\beta$G; अनुचिन्तयत् P **31c** **पूर्वोक्त॰**] $K_{ED}\beta$G; पूर्वोक्तं P ♦ **॰ाकारं**] $K_{ED}\gamma$; ॰ाधारं β **32a** **॰ावृति॰**] $K_{ED}\beta$G; ॰ावृतिर् P **32b** **केन**] $K_{ED}\beta$P; कन G **32c** **हीन॰**] K_{ED}Bγ; हीत॰ J **33a** **यया**] $K_{ED}\beta$P; तया G ♦ **सर्व**] K_{ED}B^{pc}; सर्वं B$^{ac}\gamma$J **33b** **स्पर्शवेदी**] K_{ED}B; शब्दवेदी GJ, शब्दभेदी P

[शब्दतन्मात्रधारणा 1. शुद्धा]

कर्णौ पिधाय यत्नेन निमीलितविलोचनः ॥३३॥
संशृणोति महाघोषं चेतस्तत्रानुसंदधेत् ।
दीप्यते जाठरो वह्निस्ततोऽस्य दशभिर्दिनैः ॥३४॥
दूराच्छ्रवणविज्ञानं षण्मासादुपजायते ।

[2.–3. सकलद्वयोर्धारणे]

यस्तस्यान्ते ध्वनिर्लिन्दः किं चित्किं चिद्विभाव्यते ॥३५॥
सकलात्मा स विज्ञेयस्तदभ्यासादनन्यधीः ।
शब्दावरणविज्ञानमाप्नोति स्थिरतां गतम् ॥३६॥

[4.–5. प्रलयाकलद्वयोर्धारणे]

यः पुनः श्रूयते शब्दस्तदन्ते शङ्खनादवत् ।
प्रलयाकलरूपं तदभ्यस्यं तत्फलेप्सुभिः ॥३७॥

33cd–34ab *cf.* $\mathrm{SvaTa}_{\mathrm{KSTS}}$ 4.365cd–367ab, 12.152–153ab; *cf.* $\mathrm{MatPār}_{\mathrm{BH}}$ YP 2.22cd–29; *cf.* $\mathrm{TaĀl}_{\mathrm{KSTS}}$ 5.128ab–131ab; ŚārTil 25.45–47ab; $\mathrm{MatsySaṃ}_{\mathrm{S}}$ 1.382; $\mathrm{GheSaṃ}_{\mathrm{V}}$ 5.79–83 **33cd–35ab** *cit.* $\mathrm{SvaTaUd}_{\mathrm{KSTS}}$ 12.95cd–98ab:*e* **33cd–44ab** *cf.* $\mathrm{SvaTa}_{\mathrm{KSTS}}$ 12.97cd: अरूपं शब्दतन्मात्रं ध्यातव्यं बिन्दुरूपि च ; on the eight sounds see $\mathrm{SvaTa}_{\mathrm{KSTS}}$ 11.3cd–7ab, + DhaŚiPad *cit.* by Kṣemarāja *ad loc*

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B J G P[–34b, 37b–] = α; B J = β; G P[–34b, 37b–] = γ

34a **संशृणोति**] βG; यं शृणोति K_{ED}B[mg] *SvaTaUd*$_{KSTS}$, स शृणोति P 34b–37ab महाघो... *omitted* P 34b **°संदधेत्**] B(*aiśa for* अनुसंदध्यात); °संधयेत् K_{ED}GJ *SvaTaUd*$_{KSTS}$ 34c **जाठरो**] $K_{ED}\beta$ *SvaTaUd*$_{KSTS}$; जाठरे G ♦ **वह्निस्**] $K_{ED}\beta$ *SvaTaUd*$_{KSTS}$; वह्नि G 35a **छ्रवण°**] $K_{ED}\alpha$; °कथन° *SvaTaUd*$_{KSTS}$ 35cd *omitted* G 37b **तदन्ते**] $K_{ED}\beta$; तन्मते G 37c **प्रलयाकल°**] $K_{ED}\beta$G; प्रलयाकाल° P 37d **अभ्यस्यं तत्°**] K_{ED}B[pc]; अभ्यस्यं ⟨तु⟩ B[ac], अभ्यस्यंतः γJ

[6.–7. विज्ञानाकलद्वयोर्धारणे]

स एवातितरामन्यशब्दप्रच्छादको यदा ।
विज्ञानाकल इत्युक्तस्तदासावपराजिते ॥३८॥

[8.–9. मन्त्रद्वयोर्धारणे]

मनोह्लादकरो योऽन्यस्तदन्ते संविभाव्यते ।
स मन्त्र इति विज्ञेयो योगिभिर्योगकाङ्क्षिभिः ॥३९॥

[10.–11. मन्त्रेश्वरद्वयोर्धारणे]

ततस्तु श्रूयते योऽन्यः शान्तघण्टानिनादवत् ।
स मन्त्रेश इति प्रोक्तः सर्वसिद्धिफलप्रदः ॥४०॥

[12.–13. मन्त्रमहेश्वरद्वयोर्धारणे]

घण्टानादविरामान्ते यः शब्दः संप्रजायते ।
मन्त्रेशेशपदं तदधि सिद्धीनां कारणं महत् ॥४१॥

[14.–15. शक्तिशिवयोर्धारणे]

अनिलेनाहता वीणा यादृङ्नादं विमुञ्चति ।
तादृशो यो ध्वनिस्तत्र तं विद्याच्छाम्भवं पदं ॥४२॥

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V[40b–] J G P = α; B V[40b–] J = β; G P = γ

38a एवातितरामन्य°] $K_{ED}B^{mg}$; एवातिमनानन्य° α **38b °प्रच्छादको**] $K_{ED}B^{pc}$; °प्रच्छादके $B^{ac}\gamma$J **38c विज्ञानाकल**] $K_{ED}\beta$; विज्ञानाकिल γ **39b तदन्ते**] $K_{ED}B^{mg}$; तदन्तः α ♦ **संविभाव्यते**] $K_{ED}B^{mg}$; स विभाव्यते βG, स व्यभाविते P **39d योगकाङ्क्षिभिः**] $K_{ED}\beta$G; योगिकाङ्क्षिभिः P **40c प्रोक्तः**] $K_{ED}\beta$; मन्त्रः $K_1\gamma$ **41a °विरामान्ते**] $K_{ED}B\gamma$V; °विरागान्ते J **41c मन्त्रेशेश°**] $K_{ED}B\gamma$V; मन्त्रेशेष° J **42b यादृङ्नादं**] K_{ED}GVJ; यादृङ्ना∗B, यादृ⊔⊔दं P ♦ **विमुञ्चति**] K_{ED}G; प्रमुञ्चति β **42d विद्याच्**] $K_{ED}B\gamma$J; विन्द्याच् V

40b The testimony of V resumes.

पृथग्वा क्रमशो वापि सर्वानेतान्समभ्यसेत् ।
प्राप्नोति सर्ववित्सिद्धीः शब्दावरणमाश्रिताः ॥४३॥
इत्येताः कथिताः पञ्च तन्मात्राणां तु धारणाः ।

इति श्रीमालिनीविजयोत्तरे तन्त्रे
तन्मात्रधारणाधिकारश्चतुर्दशः
समाप्तः

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ; V J = VJ

43b एतान्] K_{ED}Gβ; एतात्त् P **43d आश्रिताः**] K^{pc}_{ED}; आश्रितः $K^{ac}_{ED}\alpha$ **44a एताः**] K_{ED}V; एतत् BγJ

Explicit 14 इति श्रीमालिनीविजयोत्तरे तन्मात्राधिकरश्चतुर्दशः 14 B; इति श्रीमालिनीविजयोत्तरे तन्मात्राकरश्चतुर्दशः 14 G, इति श्रीमालिनीविजयोत्तरे तन्मात्राधिकरश्चतुर्दशः V, इति श्रीमालिनीविजयोत्तरे तन्मात्राधिकरश्चतुर्दशः सर्गः 14 J; इति श्रीमालिनीविजयोत्तरे तत्मात्राधिकरश्चतुर्दशः P

15

अथ वागिन्द्रियादीनां मनोन्तानामनुक्रमात् ।
धारणाः संप्रवक्ष्यामि दशैकांश्च समासतः ॥१॥

[वाग्धारणा]

वदनान्तं नभःशब्दमात्मनश्चिन्तयेद्बुधः ।
गृहीतवाक्क्रमभ्येति मौनेन मधुसूदनि ॥२॥
सर्वत्रास्खलिता वाणी षड्भिर्मासैः प्रवर्तते ।
सर्वशास्त्रार्थवेत्तृत्वं वत्सरादुपजायते ॥३॥
वागेवास्य प्रवर्तेत काव्यालङ्कारभूषिता ।
त्रिभिरब्दैः स्वयं कर्ता शास्त्राणां संप्रजायते ॥४॥
तत्रैव चिन्तयेद्देहं स्वकीयमनुरूपतः ।
भूयस्तमेव धवलमीषत्तेजोवभासितम् ॥५॥
रसान्तःसोमबिम्बादितेजोन्तं तमनुस्मरेत् ।

Adhikāra 15.1–47 *cf.* YoSū 3.46 **1–15** ∆ MatPār$_{BH}$ YP 4.84cd–93ab **2a नभः॰** :: *cf.* JaĀkhSaṃ$_{GOS}$ 33.62a: निवर्तते सदाशब्दो **2–6** ∆ SvaTa$_{KSTS}$ 12.10cd

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

Adhikāra 15.1d धारणाः] $K_{ED}\beta$; धारणा γ **1d समासतः**] K_{ED}-$B^{pc}\gamma$VJ; समा⟨स्थइ⟩तः B^{ac} **2a वदनान्तं**] K_{ED}^{pc}; वचनान्तं $K_{ED}^{ac}\alpha$ ♦ **नभः॰**] VJ; नमः॰ K_{ED}BP, मनः G **3a सर्वत्रास्खलिता वाणी**] K_{ED}-βP; सर्वत्रांम्स्वलितावाली G **3c ॰वेत्तृत्वं**] $K_{ED}\beta$G; ॰वत्त्वेत्वं P **4a प्रवर्तेत**] $K_{ED}\beta$P; प्रवर्तन्ते G **4d शास्त्राणां**] $K_{ED}\beta$P; शास्त्राणा G **5d ॰तेजोवभासितम्**] $K_{ED}\beta$P; ॰तेजोभवासितम् G **6a रसान्तः**] K_{ED}; रसो⟨ऽ⟩न्तः α **6b तेजोन्तं तम्**] K_{ED}; तेजोन्तं तद् βP, तेजोतन्तद् G ♦ **अनुस्मरेत्**] K_{ED}BγJ; अनुस्मरन् V

Incipit 15 ॐ श्रीगुरुभ्यो नमः ॐ J, : P **5c** A correct *[ra]na-vipulā*: – – ˘ – – ˘ ˘ ˘ ˘.

सर्वं फलमवाप्नोति वागावरणजं क्रमात् ॥६॥

[हस्तधारणा]

पाणौ चित्तं समादाय षण्मासाद्दूरसंस्थितम् ।
वस्तु गृह्णात्यसंदेहात् त्र्यब्दात्पारेऽपि वारिधेः॥७॥
तत्रात्मदेहपूर्वं तु पद्माभमनुचिन्तयन् ।
सव्यापारादिभेदेन चतुर्दशकमादरात् ॥८॥
पुरोक्तकालनियमात्पूर्वोक्तेनैव वर्त्मना ।
सर्वं फलमवाप्नोति हस्तावृतिसमाश्रितम् ॥९॥

[पादधारणा]

पादावेवंविधौ ध्यायन्वत्सरत्रयमादरात् ।
मुहूर्तेन समुद्रान्तामश्रान्तो भ्रमति क्षितिम् ॥१०॥
चतुर्दश समभ्यर्च्य स्वदेहादिकमभ्यसन् ।

7–9 Δ $\mathrm{SvaTa}_{\mathrm{KSTS}}$ 12.91ab **10–11** Δ $\mathrm{SvaTa}_{\mathrm{KSTS}}$ 12.91cd

---

Codd: K_1 K_2 K_3 $K_4 \simeq K_{ED}$; B V J G P = α; B V J = β; G P = γ

6c **अवाप्नोति**] $K_{ED}\beta$P; अवाप्नोतिर् G **7a** **चित्तं**] α; च तं K_{ED}-B^{mg} **7b** **षण्मासाद्**] $K_{ED}\beta$P; षण्मासा G **7c** **गृह्णात्यसंदेहात्**] $K_{ED}\beta$; गृह्णाति संदेहात् γ **7d** **वारिधेः**] $K_{ED}\beta$; वारिधः γ **8a** **°देह°**] $K_{ED}^{ac}\beta$G; °देहं K_{ED}^{pc}, °देव° P **8b** **अनुचिन्तयन्**] $K_{ED}\beta$P; अनुचिन्तयेन् G **9a** **पुरोक्त°**] $K_3\alpha$; पूर्वोक्त° K_{ED}, पूरोक्त° B^{mg} ♦ **°नियमात्**] $K_{ED}\beta$P; °नियमा G **9d** **°ावृति°**] K_{ED}BV; °ावृत्ति° γJ **10a** **पादाव्**] $K_{ED}\beta$; पदाव् γ ♦ **एवंविधौ**] *em.*Sanderson; एवंविधो $K_{ED}\alpha$ ♦ **ध्यायन्**] K_{ED}BγV; ध्यान् J **10c** **समुद्रान्ताम्**] $K_{ED}\beta$G; समुद्रान्तम् P **10d** **भ्रमति**] $K_{ED}\beta$; भ्रमनि G, भ्रमंति P **11b** **स्वदेहादिकम्**] K_{ED}VP; स्वदेहाधिकम् BGJ

8a A correct *[ra]ma-vipulā:* ⏑––––,–––⏑. **9a** A correct *[ra]na-vipulā:* ––⏑–⏑⏑⏑–.

प्राप्नोति पूर्ववत्सर्वं फलं पादावृतिस्थितम् ॥११॥

[पायुधारणा]

पायावपि मनस्तत्त्वं स्थिरीकुर्वन्नवाप्स्यति ।
मासेन तद्भवव्याधिविमुक्तिमविलम्बतः ॥१२॥
पुण्यश्लोकत्वमाप्नोति त्रिभिरब्दैरनादरात् ।
चतुर्दशविधं चात्र पूर्ववत्फलमाप्स्यति ॥१३॥

[लिङ्गधारणा]

स्वरूपतः स्मरेल्लिङ्गं मासमात्राज्जितेन्द्रियः ।
षड्भिर्मासैरनायासादिच्छाकामित्वमाप्नुयात् ॥१४॥
चतुर्दशविधे भेदे तत्राभ्यस्ते महामतिः ।
लिङ्गावरणजं सर्वं पूर्ववल्लभते फलम् ॥१५॥

[जिह्वाधारणा]

स्वजिह्वामिन्दुवर्णाभां चिन्तयेद्दशभिर्दिनैः ।

12–13 ∆ SvaTa$_{KSTS}$ 12.92ab **14–15** ∆ SvaTa$_{KSTS}$ 12.92cd–93ab **14d** **इच्छाकामित्वम्** :: *cf.* SvaTa$_{KSTS}$ 12.93b: इच्छया रमते शतम् **16–19** ∆ SvaTa$_{KSTS}$ 12.95d **16–36** ∆ MatPār$_{BH}$ YP 4.93cd–98ab

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

11c **सर्वं**] $K_{ED}^{pc}\beta$P; सर्व° K_{ED}^{ac}G **11d** **पादावृतिस्थितम्**] $K_{ED}B^{ac}$V; पादावृतिस्थितिम् B^{pc}, पदादृतिस्थितिम् γ, प्रादावृत्तिस्थितिम् J **12a** **पायाव्**] $K_{ED}B^{mg}\gamma$VJ; पादाव् B ♦ **°तत्त्वं**] $K_{ED}B^{mg}$; तद्वत् $K_3\alpha$ **12b** **स्थिरी°**] $K_{ED}\beta$P; स्थिति° G **12c** **°व्याधि°**] $K_{ED}\beta$G; °श्याधि° P **12d** **अविलम्बतः**] K_{ED}^{pc}; अवलम्बितः $K_{ED}^{ac}\alpha$ **13a** **पुण्यश्लोकत्वम्**] $K_{ED}\beta$G; पुण्यं श्लोकत्वम् P **13c** **चात्र**] K_{ED}BV; वात्र G, चात J **14b** **°मात्राज्**] $K_{ED}\beta$G; °मात्रः P **14c** **अनायासाद्**] $K_{ED}\beta$P; अनायाद् *unmetrical* G **14d** **इच्छाकामित्वम्**] $K_{ED}\beta$P; इच्छासिद्धिम् K_1G ♦ **आप्नुयात्**] $K_{ED}\beta$P; अवाप्नुयात् G **15b** **तत्राभ्यस्ते**] $K_{ED}\gamma$V; तत्राभ्यस्तो BJ **16b** **चिन्तयेद्**] $K_{ED}\beta$; चिन्तये G, चिन्त P

प्राप्नोत्यनुभवं योगी जिह्वाभावमिवात्मनः ॥१६॥
आस्वादयति दूरस्थं षण्मासादेकमानसः ।
वत्सरैस्तु त्रिभिः साक्षाल्लेढ्यसौ परमामृतम् ॥१७॥
येनासौ भवते योगी जरामरणवर्जितः ।
अपेयादिप्रसक्तोऽपि न पापैः परिभूयते ॥१८॥
पूर्ववत्सर्वमन्यच्च स्वदेहाद्यनुचिन्तयन् ।
फलमाप्नोत्यसंदेहाद्रसनावृतिसंभवम् ॥१९॥

[घ्राणधारणा]

कनकाभं स्वकं घ्राणमनुचिन्तयतः शनैः ।
दिवसैर्दशभिर्घ्राणशुन्यतानुभवो भवेत् ॥२०॥
षण्मासाद्गन्धमाघ्राति दूरस्थस्यापि वस्तुनः ।
घातयेद्गन्धमाघ्राय यस्य रुष्टो भविष्यति ॥२१॥
वत्सरैस्तु त्रिभिर्दिव्यं गन्धमासाद्य योगवित् ।
जरामरणनैर्गुण्ययुक्तो दिव्यत्वमर्हति ॥२२॥

20–23 Δ SvaTa$_{\text{KSTS}}$ 12.96a

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

16d **जिह्वाभावमिवात्मनः**] *conj.*; जिह्वाभवमिवात्मनः $K_{ED}\beta$G, जिह्वा-मनुभवात्पुनः P 17b **°मानसः**] $K_{ED}\beta$G; °मानसाः P 17c **वत्सरैस्**] $K_{ED}\beta$P; वत्सरेस् G ♦ **तु**] K_{ED}BγJ; *omitted* V 17d **लेढ्यसौ**] K_{ED}BGV; लेढसौ J, लेढ्यासौ P 18a **भवते**] BGV; भवति K_{ED}-B^{mg}J, भवती P 18c **°प्रसक्तो**] BP; °प्रमुक्तो K_{ED}GJ; °प्रमक्तो V 19c **आप्नोत्यसंदेहाद्**] $K_{ED}\beta$; आप्नोति संदेहाद् γ 19d **रसनावृति°**] K_{ED}BV; रसनादृति° γ, रसनाधृति° J 20a **स्वकं**] K_{ED}BγV; सुकं J ♦ **घ्राणम्**] $K_{ED}B^{mg}$; ज्ञानं $K_1\alpha$ 21a **षण्मासाद्**] K_{ED}BJ; षण्मासा γ, षाण्मासाद् V ♦ **आघ्राति**] $K_{ED}\beta$G; आघ्राय P 21b **वस्तुनः**] $K_{ED}\beta$; वस्तुतः γ 21d **रुष्टो**] BJP; दुष्टो K_{ED}GV 22a **वत्सरैस्**] $K_{ED}\beta$G; वत्सरै P ♦ **तु**] K_{ED}BγJ; *omitted* V 22c **°नैर्गुण्य°**] $K_{ED}\beta$; °निर्गुण्य° γ 22d **अर्हति**] K_{ED}BγJ; अर्पति V

सर्वमन्यद्यथोद्दिष्टं तथैव च विचिन्तयेत् ।
क्रमिकं फलमाप्नोति घ्राणावरणमास्थितम् ॥२३॥

[चक्षुर्धारणा]

उदयादित्यसंकाशे चिन्तयंश्चक्षुषी निजे ।
दशाहाच्चक्षुषो रक्तस्रावानुभवमाप्स्यति ॥२४॥
वेदना महती चास्य ललाटे संप्रजायते ।
न भेतव्यं महादेवि न चाभ्यासं परित्यजेत् ॥२५॥
संत्यजन्नन्धतामेति तेन यत्नात्समभ्यसेत् ।
षड्भिर्मासैर्महायोगी दिव्यदृष्टिः प्रजायते ॥२६॥
छिद्रां प्रपश्यते भूमिं कटाहान्तामतन्द्रितः ।
आध्रुवान्तमथोर्ध्वं च करामलकवद्बुधः ॥२७॥
वत्सरैस् तु त्रिभिर्योगी ब्रह्माण्डान्तं प्रपश्यति ।
तदन्तर्योगिनीज्ञानं शरीरस्थं प्रजायते ॥२८॥
स्वदेहादिकमन्यच्च पूर्वोक्तं पूर्ववत्स्मरन् ।

24–29 Δ SvaTa$_{KSTS}$ 12.95c

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P[–25ab, 28–] = α; B V J = β; G P[–25ab, 28–] = γ

23b **तथैव च**] K_{ED}G; ⟨तहैय⟩⊔B, ⊔⊔⊔⊔ V, ⟨ततो दिशि⟩ J, तथैवद P 23d **घ्राणावरणम्**] $K_{ED}\beta$P; प्राणावरणम् G 24b **चिन्तयंश्**] K_{ED}; चिन्तयच् γ, चिन्तयज् β 24c **चक्षुषो**] K_{ED}BγV; चक्षुषों J ♦ **रक्त°**] $K_{ED}\beta$; रक्ता° γ 26a **संत्यजन्न्**] $K_{ED}\beta$; संत्यजन् G 26c **मासैर्**] $K_{ED}\beta$; मासै G 26d **°दृष्टिः**] $K_{ED}\beta$; °द्रष्टिः G 27b **कटाहान्ताम्**] K_{ED}J; कटाहान्तम् BGV 27d **करामलकवद्**] βG; कराकमलवद् K_{ED} 28c **तदन्तर्**] $K_{ED}\beta$; तदन्त° γ

28a The testimony of P resumes.

नयनावृतिजं सर्वमाप्नोतीति किमद्भुतम् ॥२९॥

[त्वग्धारणा]

सर्वत्राञ्जनापुत्राभां निस्तरङ्गां त्वचं स्मरन् ।
शस्त्रैरपि न मासेन छेत्तुं शक्यो भविष्यति ॥३०॥
षण्मासादतितीव्रेण नाग्निनाप्येष दह्यते ।
वत्सरत्रितयाद्योगी वज्रोपलविषाहिभिः ॥३१॥
पीड्यते न कदा चित्स्यादजरामरतां गतः ।
स्पर्शावृतिजविज्ञानगीतवच्च चतुर्दश ॥३२॥
भेदाः सह फलैरज्ञेयाः पूर्वकालानुसारतः ।
किं त्वत्र चिन्तयेद्देहं स्वदेहादिभिरावृतम् ॥३३॥

[श्रोत्रधारणा]

संदधानः स्वकं चेतः श्रोत्राकाशे विचक्षणः ।
दूराच्छ्रवणविज्ञानं षण्मासादुपजायते ॥३४॥

30–33 Δ SvaTa$_{KSTS}$ 12.94cd   33–36 Δ SvaTa$_{KSTS}$ 12.93cd–94ab

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

29c **नयनावृतिजं**] $K_{ED}\beta$; नयनदृतिजं γ 29d **आप्नोतीति**] K_{ED}BJP; आप्नोतिति G, अप्नोतीति V   30a **°ाञ्जनापुत्राभां** *conj.*] ; °ाञ्जनपुत्राभां BJP, °ाञ्जनपत्राभां K_{ED}, °ाञ्जनयत्राभां G, °ाञ्जनपुञ्जाभां V   30d **छेत्तुं**] *corr.*; छेतुं $K_3\beta$P; हन्तुं K_{ED}, हेतुं G   31b **नाग्निनाप्य्**] $K_{ED}\beta$P; नाग्निप्य् *unmetrical* G   31d **वज्रोपल°**] K_{ED}BVγ; वचोपल° J ♦ **°विषाहिभिः**] *conj.*; °विषादिभिः $K_{ED}\alpha$ 32a **पीड्यते**] $K_{ED}\beta$G; पीडिते P   32c **°ावृति°**] $K_{ED}\beta$; °ादृति° γ 33a **सह**] $K_{ED}\beta$; स° P ♦ **फलैर्**] $K_{ED}\beta$P; फलै G ♦ **ज्ञेयाः**] K_{ED}BGJ; ज्ञेया V, ज्ञायाः P   33c **किं त्व्**] K_{ED}BγV; कित्व् J ♦ **चिन्तयेद्**] $K_{ED}\beta$P; चिन्तये G   33d **स्वदेहादिभिर्**] $K_{ED}\gamma$V; सुदेहादिभिर् J   34c **°विज्ञानं**] $K_{ED}\beta$G; °विज्ञान P

त्रिभिः संवत्सरैरदेवि ब्रह्माण्डान्तरुदीरितम् ।
शृणोति स स्फुटं सर्वं जरामरणवर्जितः ॥३५॥
तत्राकाशोक्तवत्सर्वं स्वदेहाद्यनुचिन्तयेत् ।
श्रोत्रावरणजं सर्वं फलमाप्नोति पूर्ववत् ॥३६॥

[मनोवतीधारणा]

मनोवतीमतो वक्ष्ये धारणां सर्वसिद्धिदाम् ।
यया संसिद्धया देवि सर्वसिद्धिफलं लभेत् ॥३७॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
तस्मात्तदभ्यसेन्मन्त्री यदीच्छेन्मोक्षमक्षयम् ॥३८॥
तदर्धचन्द्रसंकाशमधोवक्त्रं हृदि स्थितम् ।
चिन्तयन्मासमात्रेण प्रतिभां प्रतिपत्स्यते ॥३९॥
अकस्मात्पश्यते किं चिदकस्माच्छृणुते तथा ।
सर्वेन्द्रियात्मकं ज्ञानं अकस्माच्च क्व चित्क्व चित् ॥४०॥
स्वस्वकेन्द्रियविज्ञानं संपश्येद्वत्सरत्रयात् ।

37–42 Δ SvaTa$_{KSTS}$ 12.96b; Δ MatPār$_{BH}$ YP 4.98cd–100ab

---

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

35b **ब्रह्माण्डान्तर्**] K_{ED}; ब्रह्माण्डान्तम् α 35c **शृणोति**] $K_{ED}\beta$G; शृणि P ♦ **स स्फुटं**] $K_{ED}\beta$P; विस्फुटं K_1G 36a **सर्वं**] $K_{ED}\beta$; सर्व° G 36b **अनुचिन्तयेत्**] K_{ED}G; अनुचिन्तयन् βP 37a **मनोवतीमतो**] $K_{ED}\beta$P; मनोवतीमनो G 38b **°मोक्षयोः**] $K_{ED}\beta$G; °मोक्षयो P 38d **यदीच्छेन मोक्षम्**] $K_{ED}\beta$; यस्यच्छेदोक्तम् G, यद्यश्च्श्र्ाएन P ♦ **अक्षयम्**] $K_3\beta$; अव्ययम् $K_{ED}\gamma$ 39d **प्रतिभां**] K_{ED}BV; पतितां $K_1\gamma$, प्रतितां J ♦ **प्रतिपत्स्यते**] $K_{ED}\beta$P; प्रतिपद्यते G 40d **अक्समाच्च**] $K_{ED}\beta$P; अकस्माच G 41b **°त्रयात्**] $K_{ED}\beta$; °त्रयाम् γ

भवते योगयुक्तस्य योगिनः सुपरिस्फुटम् ॥४१॥
स्वदेहादिकमप्यत्र पूर्वोक्तवदनुस्मरन् ।
चित्तावरणविज्ञानं प्राप्य सोमगुणं लभेत् ॥४२॥
इत्येकादश गीतानि समभ्यस्यानि ते तथा ।
इन्द्रियाणि यतः सर्वं फलमेषु प्रतिष्ठितम् ॥४३॥
बन्धमोक्षावुभावेताविन्द्रियाणि जगुर्बुधाः ।
विगृहीतानि बन्धाय विमुक्तानि विमुक्तये ॥४४॥
एतानि व्यापके भावे यदा स्युर्मनसा सह ।
विमुक्तानीति विद्वद्भिर्ज्ञातव्यानि तदा प्रिये ॥४५॥
यदा तु विषये क्वापि प्रदेशान्तरवर्तिनि ।
संस्थितानि तदा तानि बद्धानीति प्रचक्षते ॥४६॥
इत्ययं द्विविधो भावः शुद्धाशुद्धप्रभेदतः ।

44–47 ≈ TaĀl$_{KSTS}$ 17.112–114; *cf.* TaĀl$_{KSTS}$ 17.103–111; *cf.* VaiSū 5.2.16–17 **45** *cit.* TaĀlViv$_{KSTS}$ 17.113–114:*a* **46** *cit.* TaĀlViv$_{KSTS}$ 17.113–114:*b*

Codd: K$_1$ K$_2$ K$_3$ K$_4$ ≃ K$_{ED}$; B V J G P = α; B V J = β; G P = γ

42d सोम॰] K$_{ED}$BγJ; सोम्य॰ V **43b तथा**] K$_{ED}\gamma$VJ; यथा B **43c यतः**] K$_{ED}\gamma$VJ; ∗तः B **43d एषु**] *conj.*; एव K$_{ED}$B$^{mg}\gamma$, एष β **44b इन्द्रियाणि**] α *TaĀl*$_{KSTS}$; इन्द्रियाणां K$_{ED}$ **44c विगृही-तानि**] K$_{ED}\alpha$; निगृहीतानि *TaĀl*$_{KSTS}$ **45b मनसा**] K$_{ED}\beta$P *TaĀl*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; मसा *unmetrical* G **45c विद्वद्भिर्**] K$_{ED}\beta$ *TaĀlViv*$_{KSTS}$; विद्वद्भि G, विदुद्भिर् P **45d ज्ञातव्यानि**] K$_{ED}\beta$P *TaĀl*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; ज्ञातवानि G ♦ **तदा प्रिये**] K$_{ED}\alpha$ *TaĀlViv*$_{KSTS}$; विमुक्तये V^{vl} **46a यदा तु**] K$_{ED}$ *TaĀlViv*$_{KSTS}$; यदापि α **46b ॰वर्तिनि**] K$_{ED}\beta$ *TaĀl*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; ॰वर्त्मनि γ **46c तदा तानि**] K$_{ED}$ *TaĀl*$_{KSTS}$ *TaĀlViv*$_{KSTS}$; तदेतानि K$_1\alpha$ **47a अयं**] K$_{ED}\alpha$; एवं *TaĀl*$_{KSTS}$

इन्द्रियाणां समाख्यातः सिद्धयोगीश्वरीमते ॥४७॥

इति श्रीमालिनीविजयोत्तरे तन्त्रे
ऽक्षधारणाधिकारः पञ्चदशः
समाप्तः

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

Explicit 15 इति श्रीमालिनीविजयोत्तरे अक्षधारणाधिकारः पञ्चदशमः 15 BG; इति श्रीमालिनीविजयोत्तरे अक्षधारणाधिकारः पञ्चदशमः 15 V; इति श्रीमालिनीविजयोत्तरे अक्षधारणाधिकारः पञ्चदशमः सर्लिः 15 J; इति श्रीमालिनीविजयोत्तरे अक्षधारणाधिकारः पञ्चदशः / P

16

अथ गर्वमयीं दिव्यां धारणां धारणोत्तमाम् ।
महागर्वकरीं वक्ष्ये योगिनां योगवन्दिते ॥१॥

[अहंकारधारणा, 1. शुद्धा]

षोडशारं स्मरेच्चक्रमात्मदेहमनन्यधीः ।
एषोऽहमिति संचिन्त्य स्वकार्यपरिवारितम् ॥२॥
अप्रधृष्यो भवेद्योगी वत्सरत्रितयेन तु ।
ममत्वमच्युतं तस्य भवेत्सर्वत्र कुत्र चित् ॥३॥

[2.–3. सकलद्वयोर्धारणे]

तादृग्रूपस्य चक्रस्य नाभिं मूर्तिं स्वकां स्मरन् ।
चिन्तयेत्सर्वमेवाहं मयि सर्वमवस्थितम् ॥४॥
ततोऽहङ्कारविज्ञानं प्राप्नोतीति किमद्भुतम् ।

[4.–5. प्रलयाकलद्वयोर्धारणे]

हृच्चक्रे समनुध्यायन्मत्स्वरूपमतन्द्रितः ॥५॥
अविलम्बमवाप्नोति गर्वावरणजं फलम् ।

Adhikāra 16.1–3a *cit.* SvaTaUd$_{KSTS}$ 12.99ab:*a* **1–7** Δ SvaTa$_{KSTS}$ 12.98cd–99ab; Δ MatPār$_{BH}$ YP 4.100cd–106ab **5d** **मत्स्वरूपम्** :: SvaTa$_{KSTS}$ वैकारिके तथा रुद्रो

Codd: K_1 K_2 K_3 K_4 ≃ K_{ED}; B V J G P = α; B V J = β; G P = γ

Adhikāra 16.1b **धारणां**] $K_{ED}\beta$ *SvaTaUd*$_{KSTS}$; धारणान् G ♦ **॰त्तमाम्**] $K_{ED}\beta$G *SvaTaUd*$_{KSTS}$; ॰तुमाम् P **2b** **आत्मदेहम्**] $K_{ED}\alpha$; आत्मन्यहम् K_2 *SvaTaUd*$_{KSTS}$ **3c** **अच्युतं**] $K_{ED}\beta$P; उच्युतं G **3d** **कुत्र**] $K_{ED}\beta$; क्वत्र γ **4b** **मूर्तिं**] $K_{ED}\beta$P; मूर्ति॰ G **5c** **समनुध्यायन्**] $K_{ED}\beta$G; समुनुध्यायन् P **6a** **अविलम्बम्**] *conj.* Sanderson; अवलोकम् B, अर्कलोकम् K_{ED}, अकलोकम् γVJ

Incipit 16 ॐ श्रीगुरुभ्यो नमः ॐ J

[6.–15. विज्ञानाकलादिशिवान्ता धारणाः]

बिम्बादिकं क्रमात्सर्वं चिन्तयन्नीललोहितम् ॥६॥
तद्भवं सर्वमाप्नोति दशावस्थाप्रचोदितम् ।
इति गर्वमयी प्रोक्ता प्रजापतिगुणप्रदा ॥७॥

[बुद्धिधारणा, 1. शुद्धा]

उद्यदादित्यबिम्बाभं हृदि पद्मनुस्मरन् ।
धर्मादिभावसंयुक्तमष्टपत्रं सकर्णिकम् ॥८॥
मासेन स्थिरबुद्धिः स्यात् षड्भिः श्रुतिधरो भवेत् ।
त्रिभिरब्दैः स्वयं कर्ता शास्त्राणां संप्रजायते ॥९॥

[2.–3. सकलद्वयोर्धारणे]

स्वां तत्र चिन्तयेन्मूर्तिं बुद्धितत्त्वं प्रपश्यति ।

[4.–5. प्रलयाकलद्वयोर्धारणे]

तदीशज्ञानमाप्नोति ब्रह्माणमनुचिन्तयन् ॥१०॥
वेदानुद्गिरते सुप्तः समाधिस्थोऽथवा मुनिः ।
सुस्थिरास्ते सदाभ्यासाद् अनधीता अपि स्फुटम् ॥११॥

---

8 *cit.* $\text{SvaTaUd}_{\text{KSTS}}$ 12.99cd–100a:*a* **8–12** Δ $\text{SvaTa}_{\text{KSTS}}$ 12.99cd–101ab; Δ $\text{MatPār}_{\text{BH}}$ YP 4.106cd–111; *cf.* $\text{TaĀl}_{\text{KSTS}}$ 5.19cd–42 on the बुद्धिध्यान° of the TriŚiBhai **10d** *cf.* $\text{SvaTa}_{\text{KSTS}}$ 1299c: ब्रह्माणं बुद्धिसंस्थं

Codd: K_1 K_2 K_3 K_4 $\simeq$ K_{ED}; B V J G P = α; B V J = β; G P = γ

